महर्षिपाणिनिप्रणीतं

लिङ्गानुशासनम्

'शान्ति' संस्कृत-हिन्दी व्याख्याद्वयोपेतम्

डॉ० नरेश झा

HPD

।। श्रीः ।।

चौखम्बा सुरभारती ग्रन्थमाला
३७३
******

महर्षिपाणिनिप्रणीतं

लिङ्गानुशासनम्

(समीक्षात्मकम्)

'शान्ति' संस्कृत - हिन्दीव्याख्याद्वयोपेतम्

व्याख्याकारः सम्पादकश्च
डॉ० नरेश झा
शास्त्रचूडामणि, विद्यावारिधि
पूर्वप्राचार्य
आदर्श रानी चन्द्रावती श्यामा महाविद्यालय
कचौड़ी गली, वाराणसी

चौखम्बा सुरभारती प्रकाशन
वाराणसी

प्रकाशक

चौखम्बा सुरभारती प्रकाशन

(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)
के. 37/117 गोपालमन्दिर लेन
पो. बा. नं. 1129, वाराणसी 221001

अन्य प्राप्तिस्थान

चौखम्बा पब्लिशिंग हाउस

4697/2, भू-तल (ग्राउण्ड फ्लोर)
गली नं. 21-ए, अंसारी रोड
दरियागंज, नई दिल्ली 110002

चौखम्बा संस्कृत प्रतिष्ठान

38 यू. ए. बंगलो रोड, जवाहर नगर
पो. बा. नं. 2113
दिल्ली 110007

चौखम्बा विद्याभवन

चौक (बैंक ऑफ बड़ोदा भवन के पीछे)
पो. बा. नं. 1069, वाराणसी 221001

प्रस्तावना

समस्त ज्ञानराशि के द्योतक एवं प्रवर्त्तक अनादि अपौरुषेय वेद हैं। इन ऋग्वेदादि वेदों के उपकारक शिक्षा, कल्प, व्याकरण, निरुक्त, छन्द और ज्योतिष– ये छः अंग हैं। अतः इन्हें वेदांग कहा जाता है। इन वेदांगों में व्याकरण मुखस्थानीय है– **मुखं व्याकरणं स्मृतम्**।

व्याकरण का व्युत्पत्तिलभ्य शाब्दिक अर्थ होता है– **व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणम्** अर्थात् जिससे शब्दब्रह्म की व्युत्पत्ति हो, निष्पादन हो; वह व्याकरण शास्त्र है। इस व्याकरण शास्त्र की व्युत्पत्ति होती है– वि + आङ्पूर्वक ल्युट् = अन् प्रत्यय से। वैसे तो आचार्य बोपदेव (मुग्धबोधप्रणेता) ने–

इन्द्रश्चन्द्रः काशकृत्स्नः पिशली शाकटायनः।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टाब्दिशाब्दिकाः ॥[१]

यह कहकर इन्द्रप्रोक्त ऐन्द्र व्याकरण को प्रमुखता दी है। हो सकता है कि वह ऐतिहासिक क्रम के लिये दिया हो, किन्तु दाक्षीपुत्र महर्षि पाणिनिप्रोक्त पाणिनीय व्याकरण सर्वातिशायी है। विद्वद्वर्ग इस व्याकरण को ही वेदांग का प्रतिनिधित्व करने वाला मानते हैं और उनका कहना है कि–

समुद्रवद्व्याकरणं महेश्वरे तदर्द्धकुम्भोद्धरणं बृहस्पतौ।
तद्भागभागाच्च शतं पुरन्दरे कुलाग्रबिन्दूत्पतितं हि पाणिनौ ॥[२]

अर्थात् माहेश्वर व्याकरण (जो पाणिनीय व्याकरण के नाम से ख्यात है) समुद्र के समान विस्तृत था, बृहस्पति का व्याकरण आधे घड़े में जल रखने के समान था। इसके टुकड़े का शतांश इन्द्र (ऐन्द्र) व्याकरण में विद्यमान था और पाणिनि में तो कुश के अग्रभाग से गिरने वाले जल का बिन्दु ही वर्तमान है; जिसे महर्षि पाणिनि ने सूत्ररूप में ग्रथित कर अष्टाध्यायी में लगभग चार हजार सूत्रों में संगृहीत किया। जिन्हें यथास्थान विनियोग कर आचार्य भट्टोजिदीक्षित ने सिद्धान्तकौमुदी का रूप दिया। यह व्याकरण विश्व के सभी भाषाओं के व्याकरण से समृद्ध है। इसके रक्षा, ऊह (तर्क), आगम, लघु और असन्देह निमित्त प्रयोजन सिद्ध होते हैं। इन प्रयोजनों की सिद्धि

---

१. वैदिक साहित्य (पद्मविभूषण आचार्य पं० बलदेव उपाध्याय), पृ० ३५१।
२. वैदिक साहित्य (पद्मविभूषण आचार्य पं० बलदेव उपाध्याय), पृ० ३५१।

के लिये लिङ्गानुशासन (शब्दानुशासन), शिक्षा, परिभाषा, वार्त्तिक, गणपाठ और धातुपाठ की स्थापना की गयी। कोषकार अमरसिंह ने त्रिकाण्ड उत्पलिनी आदि कोषों से नाम तथा आचार्य वररुचि के लिङ्ग (पुंस्त्वादि द्योतक) को ग्रहण कर 'नामलिंगानुशासन' (अमरकोष) की रचना की और उसके स्वरूप के विषय में कहा गया कि **नाम च लिङ्गं च नामलिङ्गे, तयोरनुशासनमिति नामलिङ्गानुशासनम्। स्वरादिनाम्नां पुंस्त्वादि-लिङ्गानाञ्च व्युत्पादकमिति**।[१] अर्थात् स्वर्ग आदि नाम और पुंस्त्वादि लिंगों के अनु-शासन का जहाँ निरूपण किया गया हो, वही नामलिंगानुशासन कहा जाता है।

इस महत्त्वपूर्ण लिङ्गानुशासन का प्रवर्त्तन आचार्य शन्तनु (विक्रम से ३१०० वर्ष पूर्व) से माना जाता है। इसके पश्चात् आचार्य व्याडि (विक्रम २८५० वर्ष पूर्व) का स्थान माना जाता है, इनकी चर्चा अनेक लिङ्गानुशासनकर्त्ताओं ने यथास्थान की है। इनके पश्चात् आचार्य महर्षि पाणिनि (विक्रम संवत् से २८०० सौ वर्ष पूर्व) का समय आता है। इनका लिंगानुशासन अभी मुख्य रूप से विख्यात है। इनके लिंगानु-शासन के अनेक व्याख्याकार हुए। आचार्य पाणिनि के पश्चात् चन्द्रगोभी (वि० सं० ११०० पूर्व), वररुचि (विक्रम-समकालीन), देवनन्दी (वि. सं. ५०० से पूर्व), शंकर (वि. सं. ६५० से पूर्व), हर्षवर्द्धन (वि. सं. ६५०-७०४), दुर्गसिंह (वि. सं. ७०० से पूर्व), वामन (वि. सं. ८५१-८७०), पाल्यकीर्ति (वि० सं. ८७१-९२४), भोजदेव, बुद्धिसागर, हेमचन्द्र सूरि, मलयगिरि, बोपदेव, हेलाराज और रामसूरि आदि आचार्य हुए हैं। इनमें अधिकांश आचार्यों के लिंगानुशासनसम्बन्धी ग्रन्थ अप्राप्य हैं।

महर्षि पाणिनि, आचार्य वररुचि, हर्षवर्द्धन, वामन और पाल्यकीर्ति (शाकटायन) के लिंगानुशासन उपलब्ध हैं। महर्षि पाणिनि के लिंगानुशासन अनेकत्र उपलब्ध हैं, सिद्धान्तकौमुदी के अन्त में तो है ही, श्री तारानाथ तर्कवाचस्पति-भट्टाचार्य के सन् १९०५ ई० में वैदुष्यपूर्ण टीका (विवृत्ति) के साथ घोष यन्त्रालय, कलिकाता (कोलकाता) द्वारा मुद्रित होकर प्रकाशित हुआ था। यही प्रति मुझे विवृत्ति (व्याख्या) लिखने में सहायक हुई। तत्पश्चात् सन् १९३०-३१ ई० में महामहोपाध्याय पं. वे. वेङ्कटराम शर्मा ने जो हर्षवर्द्धनीय लिंगानुशासन का मद्रास विश्वविद्यालय द्वारा प्रकाशन कराया, उसमें आचार्य पाणिनि, वररुचि, वामन और पाल्यकीर्ति (शाकटायन) के भी लिंगानुशासन अन्त में दिये गये हैं। इधर आकर सन् १९९९ में श्रीकृष्णदास अकादमी (चौखम्बा) द्वारा चतुर्थ संस्करण स्वामी प्रह्लादगिरि वेदान्तकेशरी के सम्पादकत्व में संस्कृत-भाषा-टीकासहित प्रकाशित है। इनके अतिरिक्त और भी

---

१. अमरकोष १।१।२ की व्याख्या।

संस्करण हो सकते हैं, जो मुझे अज्ञात हैं। हर्षवर्द्धनीय लिंगानुशासन का एक प्राचीन संस्करण जर्मन भाषानुवादसहित डॉ० फ्रान्के (Franke) के सम्पादकत्व में सन् १८९० ई० में प्रकाशित हुआ था। वामनीय लिंगानुशासन स्वल्पकाय (मात्र ३३ कारिकायें- आर्या छन्दों में) होते हुए भी बहुचर्चित है। इसका सम्भवतः प्रथम संस्करण सन् १९१८ ई० में गायकवाड़ ओरियण्टल सीरीज बरोदा से स्वोपज्ञ वृत्ति के सहित श्री चिमनलाल डी० दलाल, एम. ए. (क्यूरेटर- सेन्ट्रल लाइब्रेरी बरोदा) के सम्पादकत्व में निकला था, जिसके सम्बन्ध में आचार्य पं० युधिष्ठिर मीमांसक जी का कथन है कि 'वह चिरकाल से अप्राप्य है'[१] किन्तु काशी का सारस्वत साधनाकेन्द्र, विश्वनाथ पुस्तकालय (जो. म. गोयनका सं. महाविद्यालयीय) में ९३७।३२० संख्या पर उपलब्ध और प्राप्य है। इतना ही नहीं; इसमें अंग्रेजी भाषा में पाँच पृष्ठों का विस्तृत इन्ट्रोडक्शन तथा दो एपेन्डिक्स भी अन्त में हैं। इसकी सूचना इसलिये दे रहा हूँ कि अनुसन्धाता सन्दिग्ध या भ्रमित न रहें। हर्षवर्द्धनीय लिंगानुशासन (१९३० ई०) में तो है ही। पश्चात् आचार्य मीमांसक जी ने पाण्डित्यपूर्ण स्वोपज्ञ वृत्ति, सम्पादकीय (सं.) एवं परिशिष्टों सहित विशेष सम्भारपूर्वक सं. २०२१ वै० में प्रथम संस्करण तथा सं. २०३६ में द्वितीय संस्करण रामलाल कपूर ट्रस्ट (सोनीपत-हरियाणा) द्वारा प्रकाशित कराया है।

इन उपर्युक्त ग्रन्थों में संस्कृत तथा अंग्रेजी में भूमिकायें हैं, जिनका हिन्दी भाषा में रूपान्तर कर पाठकों की जिज्ञासा-पूर्ति के लिये परिशिष्ट में दे दिये गये हैं।

पाणिनीय लिंगानुशासन का पाठ

इस सम्बन्ध में आचार्य मीमांसक जी का कथन है कि लिंगानुशासन के उपलब्ध वृत्तियों के अवलोकन से विदित होता है कि पाणिनीय लिंगानुशासन का सूत्रपाठ अत्यधिक भ्रष्ट हो गया है। इसके शुद्ध पाठ के सम्पादन की महती आवश्यकता है[२]। सूत्रपाठ के भ्रष्ट होने का जहाँ तक प्रश्न है; पूर्ववर्त्ती (कलिकाता, मद्रास) प्राचीन संस्करणों में पाठ भ्रष्ट नहीं है। हाँ, नूतन संस्करण में यह स्थिति जरूर आ गयी है। जहाँ तक हो सका है, प्रस्तुत इस संस्करण में पूर्ववर्त्ती और पश्चाद्वर्त्ती संस्करणों का पाठान्तर संकलन कर शुद्ध पाठ स्थिर किया गया है। वस्तुतः पाठान्तर चेष्टित और अचेष्टित दोनों परिस्थितियों में हो जाया करते हैं।

---

१. संस्कृत व्याकरणशास्त्र का इतिहास, द्वितीय भाग, पृ० २९७ (लिंगानुशासन प्रकरण)

२. संस्कृत व्याकरण शास्त्र का इतिहास- द्वितीय भाग, पृ०- २७९।

अब तक के अन्य संस्करणों से प्रस्तुत संस्करण की यह विशेषता है कि सूत्र-पाठ में आये शब्दों की व्याकरणसम्बन्धी व्युत्पत्ति (मूल धातु तथा प्रत्ययादि) तथा उन शब्दों के यथासम्भव प्रयोग (महाकवियों के द्वारा प्रयुक्त) दे दिये गये हैं, जिनसे सूत्रानुसारी प्रत्यय स्वरूप पुंल्लिङ्गादि लिंगों का ज्ञान स्पष्टतः हो जाता है।

यहाँ पर यह ध्यातव्य है कि मिथिला शोध संस्थान, दरभंगा से सं० २०११ वै० में महावैयाकरण पण्डित दीनबन्धु झा जी का 'लिंग-वचनविचार' नामक लिंग-वचनादिविषयक निबन्धाकार पाण्डित्यपूर्ण ग्रन्थ प्रकाशित हुआ, जिसमें मूलतः दो प्रकार के लिंग 'लौकिकं शास्त्रीयञ्च' कहे गये हैं। लौकिक से लोक में प्रचलित-व्यवहृत लिङ्ग और शास्त्रीय लिङ्ग से विभिन्न आचार्यों द्वारा प्रतिपादित लिङ्गों से तात्पर्य है। यह लिंग और वचन विचार के लिये उपयोगी ग्रन्थ है। म. म. डॉ० उमेश मिश्र जी (निदेशक) ने आंग्ल भाषा में संस्तुत्यात्मक प्रशंसा की है।

इस समीक्षात्मक संस्करण के प्रस्तुतीकरण में विश्वनाथ पुस्तकालय के पुस्तकालयाध्यक्ष पं० देवमणि याज्ञिक एम. ए, आचार्य का योगदान स्तुत्य है, जिन्होंने लिंगानुशासन के दुर्लभ संस्करणों को सुलभ कराया।

साथ ही चौखम्बा सुरभारती के अन्यतम सञ्चालक श्री नवनीतदास जी गुप्त का मैं आभार मानता हूँ, जिन्होंने इस कार्य के लिये मुझे बहुशः प्रेरित किया।

अपरञ्च— आदर्श रानी चन्द्रावती श्यामा महाविद्यालय के प्रबन्धक श्री राजेन्द्र झा एडवोकेट (पटना उच्च न्यायालय) तथा प्रभारी प्राचार्य पं० सत्यनारायण झा एम० ए० का भी मैं आभारी हूँ, जिन्होंने आवासीय व्यवस्था सुलभ कराकर लेखन-कार्य में सुविधा प्रदान की।

इस अवसर पर मैं अपने सुयोग्य शिष्य डॉ० चन्द्रभूषण झा, साहित्याचार्य को आशीर्वाद देता हूँ, जो समस्त शैक्षणिक कार्यों में सहयोग हेतु सदा-सर्वदा तत्पर रहते हैं।

अन्त में मैं उन सभी आदरणीय ज्ञाताज्ञात विद्वानों, लेखकों के प्रति विनीत भाव से हार्दिक कृतज्ञता ज्ञापन करता हूँ, जिनके विचार एवं ग्रन्थों से मुझे कुछ भी सहयोग प्राप्त हुआ है। इत्यलं पल्लवितेन। 'भूतयेऽस्तु भवानीशः'। पर्यन्ते—

लिङ्गानुशासनस्येदं भाषा-विवृत्तिसंयुतम्।
अर्प्यते विदुषां मध्ये श्रीनरेशेन सादरम्॥

श्यामा छात्रावास
नीलकण्ठ, वाराणसी
सारस्वत-दिवस, श्रीपञ्चमी सं. २०५९

विद्वद्वशंवदः
डॉ० नरेश झा

विषयानुक्रम

***

।। श्रीवाग्देवतायै नमः ।।

मङ्गलाचरणम्

नत्वा साम्बसदाशिवं गणपतिं देवाधिदेवं तथा
ध्यात्वा पितृपदाम्बुजं गुरुवरं पूज्यां तां मातरम् ।
लिङ्गानामनुशीलनञ्च कुरुते दाक्षेयप्रोक्तं यथा
श्रौते शब्दनिरूपणे धृतमतिः शिष्टो नरेशो बुधैः ।।

चक्रेश्वरीं हृदि ध्यात्वा ध्यात्वा च कुलदेवताम् ।
शाण्डिल्येन नरेशेन क्रियते लिङ्गविवृतिः ।।

बह्वाचार्यमतं वीक्ष्य पाणिनेश्च ततोऽधिकम् ।
व्युत्पत्त्या सप्रयोगेण कृतं लिङ्गानुशासनम् ।।

व्याख्या नव्या कृता चात्र समीक्षा चापि विद्यते ।
पाठभेदो मुहुश्चापि शब्दविन्यासपूर्वकः ।।

लिङ्गानुशासनं क्वेदं क्व च स्वल्पा मतिर्मम ।
विदुषां दत्तमार्गेण एतत्सर्वं कृतं मया ।।

लिङ्गानुशासनञ्चेदं शब्दलिङ्गप्रवर्तकम् ।
भूयाच्छात्रहितार्थाय विदुषां तोषणाय च ।।

***

॥ श्रीः ॥

पाणिनीयलिङ्गानुशासन-मूलसूत्राणि

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

अथ सूत्राणि

१. लिङ्गम् ।

अथ स्त्रीलिङ्गप्रकरणम्

२. स्त्री ।
३. ऋकारान्ता मातृदुहितृस्वसृयातृननान्दरः ।
४. अन्यूप्रत्ययान्तो धातुः ।
५. अशनिभरण्यरणयः पुंसि च ।
६. मिन्यन्तः ।
७. वह्नि-वृष्ण्यग्नयः पुंसि ।
८. श्रोणियोन्यूर्मयः पुंसि च ।
९. क्तिन्नन्तः ।
१०. ईकारान्तश्च ।
११. ऊङ्याबन्तश्च ।
१२. य्वन्तमेकाक्षरम् ।
१३. विंशत्यादिरानवतेः ।
१४. दुन्दुभिरक्षेषु ।
१५. नाभिरक्षत्रिये ।
१६. उभावप्यन्यत्र पुंसि ।
१७. तलन्तः ।
१८. भूमिविद्युत्सरिल्लतावनिताभिधानानि ।
१९. यादो नपुंसकम् ।
२०. भास्स्रुक्स्रग्दिगुष्णिगुपानहः ।
२१. स्थूणोर्णे नपुंसके च ।
२२. गृहशशाभ्यां क्लीबे ।
२३. प्रावृट्विप्रुट्रुट्तृट्विट्त्विषः ।
२४. दर्विविदिवेदिखनिखान्यश्रिवेशिकृष्योषधिकट्यङ्गुलयः ।
२५. तिथिनाडिरुचिविचिनालिधूलिकिकिकेलिच्छविरात्र्यादयः ।
२६. शष्कुलिराजिकुट्यशनिवर्तिभ्रुकुटित्रुटिबलिपङ्क्तयः ।
२७. प्रतिपदापद्विपत्संपच्छरत्संसत्परिषदुषःसंवित्क्षुत्पुन्मुत्समिधः ।
२८. आशीर्धूःपूर्गीर्द्वारः ।
२९. अप्सु मनस्समासिकताकर्षाणां बहुत्वं च ।
३०. स्रक्त्वग्ज्योग्वाग्यवागूनौस्फिजः ।
३१. तृटितटिसीमासम्बध्याः ।
३२. चुल्लिवेणिखार्यश्च ।

३३. ताराधाराज्योत्स्नादयश्च।

३४. शलाका स्त्रियां नित्यम्।

इति स्त्र्यधिकारः

अथ पुँल्लिङ्गप्रकरणम्

३५. पुमान्।

३६. घञबन्तः।

३७. घाजन्तश्च।

३८. भयलिङ्गभगपदानि नपुंसके।

३९. नङन्तः।

४०. याच्ञा स्त्रियाम्।

४१. क्यन्तो घुः।

४२. इषुधिः स्त्री च।

४३. देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्त-स्तनभुजकण्ठखड्गशरपङ्काभिधानानि।

४४. त्रिविष्टपत्रिभुवने नपुंसके।

४५. द्यौः स्त्रियाम्।

४६. इषुबाहू स्त्रियां च।

४७. बाणकाण्डौ नपुंसके च।

४८. नान्तः।

४९. क्रतुपुरुषकपोलगुल्फमेघाभिधानानि।

५०. अभ्रं नपुंसकम्।

५१. उकारान्तः।

५२. धेनुरज्जुकुहूसरयुतनुरेणुप्रियङ्गवः स्त्रियाम्।

५३. समासे रज्जु पुंसि च।

५४. श्मश्रुजानुवसुस्वाद्वश्रुजतुत्रपुतालूनि नपुंसके।

५५. वसु चार्थवाचि।

५६. मद्गुमधुसीधुशीधुसानुकमण्डलूनि नपुंसके च।

५७. रुत्वन्तः।

५८. दारुकसेरुजतुवस्तुमस्तूनि नपुंसके।

५९. सक्तुर्नपुंसके च।

६०. प्राग्रश्मेरकारान्तः।

६१. कोपधः।

६२. चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि नपुंसके।

६३. कण्टकानीकसरकमोदकचषकमस्तक-पुस्तकतडाकनिष्कशुष्कवर्चस्कपिनाक-भाण्डकपिण्डककटकशण्डकपिट-कतालकफलकपलाकानि नपुंसके च।

६४. टोपधः।

६५. किरीटमुकुटललाटवटवीटशृङ्गाटकराट-लोष्टानि नपुंसके।

६६. कुटकूटकपटकवाटकर्पटनटनिकटकीट-कटानि नपुंसके च।

६७. णोपधः।

६८. ऋणलवणपर्णतोरणोष्णानि नपुंसके।

६९. कार्षापणस्वर्णसुवर्णव्रणचरणवृषण-विषाणचूर्णतृणानि नपुंसके च।

७०. थोपधः।

७१. काष्ठपृष्ठसिक्थोक्थानि नपुंसके।

७२. काष्ठादिगर्था स्त्रियाम्।

७३. तीर्थप्रोथयूथगाथानि नपुंसके च।

७४. नोपधः।

७५. जघनाजिनतुहिनकाननवनवृजिनविपिन-

वेतनशासनसोपानमिथुनश्मशानरत्ननिम्नचिह्नानि नपुंसके ।

७६. मानयानाभिधाननलिनपुलिनोद्यानशयनासनस्थानचन्दनालानसमानभवनवसनसम्भावनविभावनविमानानि नपुंसके च ।

७७. पोपधः ।

७८. पापरूपोडुपतल्पशिल्पपुष्पशष्पसमीपान्तरापाणि नपुंसके ।

७९. शूर्पकुतपकुणपद्वीपविटपानि नपुंसके च ।

८०. भोपधः ।

८१. तलभं नपुंसकम् ।

८२. जृम्भं नपुंसके च ।

८३. मोपधः ।

८४. रुक्मसिध्मयुध्मेध्मगुल्माध्यात्मकुङ्कुमानि नपुंसके ।

८५. संग्रामदाडिमकुसुमाश्रमक्षेमक्षौमहोमोद्दामानि नपुंसके च ।

८६. योपधः ।

८७. किसलयहृदयेन्द्रियोत्तरीयाणि नपुंसके ।

८८. गोमयकषायमलयान्वयाव्ययानि नपुंसके च ।

८९. रोपधः ।

९०. द्वाराग्रस्फारतक्रवक्रवप्रक्षिप्रक्षुद्रनारतीरदूरकृच्छ्ररन्ध्राश्रश्वभ्रभीरगभीरक्रूरविचित्रकेयूरकेदारोदराजस्त्रशरीरकन्दरमन्दारपञ्जराजजठराजिरवैरचामरपुष्करगह्वरकुहरकुटीरकुलीरचत्वरकाश्मीरनीराम्बरशिशिरतन्त्रयन्त्रक्षत्रक्षेत्रमित्रकलत्रचित्रमूत्रसूत्रवक्त्रनेत्रगोत्राङ्गुलित्रभलत्रशस्त्रशास्त्रवस्त्रपत्रपात्रच्छत्राणि नपुंसके ।

९१. शुक्रमदेवतायाम् ।

९२. चक्रवज्रान्धकारसारावारपारक्षीरतोमरशृङ्गारभृङ्गारमन्दारोशीरतिमिरशिशिराणि नपुंसके च ।

९३. षोपधः ।

९४. शिरीषर्जीषाम्बरीषपीयूषपुरीषकिल्विषकल्माषाणि नपुंसके ।

९५. यूषकरीषमिषविषवर्षाणि नपुंसके च ।

९६. सोपधः ।

९७. पनसविसबुससाहसानि नपुंसके ।

९८. चमसांसरसनिर्यासोपवासकार्पासवासवासमासकासकांसमांसानि नपुंसके च ।

९९. कंसं चाप्राणिनि ।

१००. रश्मिदिवसाभिधानानि ।

१०१. दीधितिः स्त्रियाम् ।

१०२. दिनाहनी नपुंसके ।

१०३. मानाभिधानानि ।

१०४. द्रोणाढकौ नपुंसके च ।

१०५. खारीमानिके स्त्रियाम् ।

१०६. दाराक्षतलाजासूनां बहुत्वं च ।

१०७. नाड्यपजनोपपदानि व्रणाङ्गपदानि ।

१०८. मरुद्गरुत्तरदृत्विजाः ।

१०९. ऋषिराशिदृतिग्रन्थिक्रिमिध्वनिबलिकौलिमौलिरविकविकपिमुनयः ।

११०. ध्वजगजमुञ्जपुञ्जाः ।

१११. हस्तकुन्तान्तव्रातवातदूतधूर्तसूतचूतमुहूर्ताः ।

११२. षण्डमण्डकरण्डभरण्डवरण्डतुण्डगण्डमुण्डपाषण्डशिखण्डाः ।

११३. वंशांशपुरोडाशाः ।

११४. ह्रदकन्दकुन्दबुद्बुदशब्दाः ।
११५. अर्घपथिमथ्यृभुक्षिस्तम्बनितम्बपूगाः
११६. पल्लवपल्वलकफरेफकटाहनिर्व्यूहमठमणितरङ्गतुरङ्गगन्धस्कन्धमृदङ्गसङ्गसमुद्रपुङ्खाः ।
११७. सारथ्यतिथिकुक्षिवस्तिपाण्यञ्जलयः ।

इति पुंलिङ्गाधिकारः

अथ नपुंसकलिङ्गप्रकरणम्

११८. नपुंसकम् (अधिकारोऽयम्) ।
११९. भावे ल्युडन्तः ।
१२०. निष्ठा च ।
१२१. त्वष्यञौ तद्धितौ ।
१२२. कर्मणि च ब्राह्मणादिगुणवचनेभ्यः
१२३. यद्यढग्यगञण्वुञ्छाश्च भावकर्मणि
१२४. द्वन्द्वैकत्वम् ।
१२५. अभाषायां हेमन्तशिशिरावहोरात्रे च
१२६. अनञ् कर्मधारयस्तत्पुरुषः ।
१२७. अनल्पे छाया ।
१२८. राजाऽमनुष्यपूर्वा समा ।
१२९. सुरासेनाच्छायाशालानिशास्त्रियां च
१३०. परवत् ।
१३१. अपथपुण्याहे नपुंसके ।
१३२. संख्यापूर्वा रात्रिः ।
१३३. द्विगुः स्त्रियां च ।
१३४. इसुसन्तः ।
१३५. अर्चिः स्त्रियां च ।
१३६. छदिः स्त्रियामेव ।
१३७. मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनान्नाभिधानानि ।
१३८. सीरार्थौदनाः पुंसि ।
१३९. वक्त्रनेत्रारण्यगाण्डीवानि पुंसि च ।
१४०. अटवी स्त्रियाम् ।
१४१. लोपधः ।
१४२. तूलोपलतालकुसूलतरलकम्बलदेवलवृषलाः पुंसि ।
१४३. शीलमूलमङ्गलसालकमलतलमुसलकुण्डलपललमृणालवालनिगलपलालबिडालखिलशूलाः पुंसि च ।
१४४. शतादिः संख्या ।
१४५. शतायुतप्रयुताः पुंसि च ।
१४६. लक्षा कोटिः स्त्रियाम् ।
१४७. शङ्कुः पुंसि (सहस्रः क्वचित्) ।
१४८. मन् द्व्यच्कोऽकर्तरि ।
१४९. ब्रह्मन् पुंसि च ।
१५०. नामरोमणी नपुंसके ।
१५१. असन्तो द्व्यच्कः ।
१५२. अप्सराः स्त्रियाम् ।
१५३. त्रान्तः ।
१५४. यात्रामात्राभस्त्रादंष्ट्रावरत्राः स्त्रियामेव ।
१५५. भृत्रामित्रछात्रपुत्रमन्त्रवृत्रमेढ्रोष्ट्राः पुंसि ।
१५६. पत्रपात्रपवित्रसूत्रच्छत्राः पुंसि च ।
१५७. बलकुसुमशुल्बयुद्धपत्तनरणाभिधानानि ।
१५८. पद्मकमलोत्पलानि पुंसि च ।
१५९. आहवसंग्रामौ पुंसि ।
१६०. आजिः स्त्रियामेव ।

१६१. फलजातिः ।

१६२. वृक्षजातिः स्त्रियामेव ।

१६३. वियज्जगत्सकृत्शकन् पृषच्छकृद्य-कृदुदश्वितः ।

१६४. नवनीतावनतानृतामृतनिमित्तवित्तचित्त-पित्तव्रतरजतवृत्तपलितानि ।

१६५. श्राद्धकुलिशदैवपीठकुण्डाङ्काङ्ग-दधिसक्थ्यक्ष्यास्यास्पदाकाश-कण्वबीजानि ।

१६६. दैवं पुंसि च ।

१६७. धान्याज्यसस्यरूप्यपण्यवर्ण्यधृष्ण्य-हव्यकव्यकाव्यसत्यापत्यमूल्यशिक्य-कुड्यमद्यहर्म्यतूर्यसैन्यानि ।

१६८. द्वन्द्वबर्हदुःखबडिशपिच्छबिम्बकुटुम्ब-कवचवरशरवृन्दारकाणि ।

१६९. अक्षमिन्द्रिये ।

इति नपुंसकाधिकारः

अथ स्त्रीपुंसाधिकारः

१७०. स्त्रीपुंसयोः ।

१७१. गोमणियष्टिमुष्टिपाटलिवस्तिशाल्मलि-त्रुटिमसिमरीचयः ।

१७२. मृत्युसीधुकर्कन्धुकिष्कुकण्डुरेणवः ।

१७३. गुणवचनमुकारान्तं नपुंसकं च ।

१७४. अपत्यार्थस्तद्धिते ।

इति स्त्री-पुंसाधिकारः

अथ पुन्नपुंसकाधिकारः

१७५. पुंनपुंसकयोः ।

१७६. घृतभूतमुस्तक्ष्वेलितैरावतपुस्तकबुस्त-लोहिताः ।

१७७. शृङ्गार्घनिदाघोद्यमशल्यदृढाः ।

१७८. व्रजकुञ्जकुथकूर्चप्रस्थदर्पार्भार्धर्चदर्भ-पुच्छाः ।

१७९. कबन्धौषधायुधान्ताः ।

१८०. दण्डमण्डखण्डशवसैन्धवपार्श्वाकाश-कुशकाशाङ्कुशकुलिशाः ।

१८१. गृहमेहदेहपट्टपटहाष्टापदाम्बुद-ककुदाश्च ।

इति पुं-नपुंसकाधिकारः

१८२. अविशिष्टलिङ्गम् ।

१८३. अव्ययं कतियुष्मदस्मदः ।

१८४. ष्णान्ता संख्या । (शिष्टा परवत्)

१८५. गुणवचनं च ।

१८६. कृत्याश्च ।

१८७. करणाधिकरणयोर्ल्युट् च ।

१८८. सर्वादीनि सर्वनामानि ।

इति लिङ्गानुशासनप्रकरणम्

इतिश्रीभट्टोजिदीक्षितविरचितायां वैयाकरणसिद्धान्तकौमुद्यां पाणिनीयलिङ्गानुशासनप्रकरणं समाप्तम् ।।

॥ श्रीः ॥

पाणिनिप्रणीतं

लिङ्गानुशासनम्

'शान्ति' संस्कृत-हिन्दीटीकाद्वयोपेतम्

१. लिङ्गम्। (लिङ्ग् + अच्) तत्र लिङ्गमित्यधिकृत्य पाणिनिनानुशिष्टम्। अधिकारसूत्रमिदम्। कथनस्याभिप्रायोऽयं यदितः परं 'सर्वादीनि सर्वनामानि' इति पर्यन्तमस्य सूत्रस्याधिकारः प्रवर्त्तते।

हिन्दी– महर्षि पाणिनि ने इसे अधिकारसूत्र के रूप में प्रवर्त्तित किया है। कहने का तात्पर्य यह है कि 'लिङ्गम्' इस सूत्र का अधिकारक्षेत्र लिङ्गानुशासन के अन्तिम सूत्र 'सर्वादीनि सर्वनामानि' तक प्रभावी है।

अथ स्त्रीलिङ्गप्रकरणम्

२. स्त्री। (स्त्यै + ड्रप् + ङीप्) स्त्यायेते शुक्रशोणिते यस्यां सा। अस्मात् स्थानादुत्तरं वक्ष्यमाणाः शब्दाः स्त्रीलिङ्गाः स्युरित्यधिकारः। तत्तदपवादस्तत्तत्सूत्रे वक्ष्यते; तथा च विशेषैरबाधिता एव स्त्रीलिङ्गाः बोध्याः।

हिन्दी– यह सूत्र भी अधिकारसूत्र के रूप में निर्दिष्ट है। यहाँ से लेकर स्त्री-लिङ्गाधिकार के 'शलाका स्त्रियाम्' सूत्र तक इसका अधिकार सुनिश्चित है। इसके अपवादस्वरूप तत् तत् सूत्र में कहा जायगा; क्योंकि विशेष सूत्रों से अबाधित ही स्त्रीलिङ्ग जानना चाहिये।

३. ऋकारान्ता मातृदुहितृयातृ[1]स्वसृननान्दरः। (मान् पूजायां तृच् नलोपः, दुह् + तृच्, यत् + ऋन्, वृद्धिश्च, सृ + अस् + ऋन् = स्वसृ, न नन्दति सेवयापि न तुष्यति न + नन्द् + ऋन् = ननान्दृ, ब०) द्वन्द्वसमासः।

व्याख्या– ऋकारान्ता मातृ-दुहितृ-यातृ-स्वसृ-ननान्दृ अमी पञ्चैव पञ्चसङ्ख्यका

१. यातृस्थाने कलिकातासंस्करणे पोतृपाठः= तत्र पोता भविष्यति। अत्र 'पावयित्री' इत्यर्थो भविष्यति।

एव स्त्रीलिङ्गाः भवन्ति नान्ये । अन्येषामेतद्भिन्नानां 'ऋन्नेभ्यः' इति सूत्रेण ङीब्विधानेन ईकारान्तत्वात् स्वस्त्रादेरेव ङीब्निषेधेन ऋदन्तत्वात्, तिसृचतस्रोस्तु स्त्रियामादेशतया प्रकृतिरूपत्वाभावेन ऋदन्तत्वेऽपि न नियमव्याघातः । **उदाहरणम्–** इयं माता जननी, जन्मदात्री; इयं दुहिता = दूरे हिता, पुत्री, आत्मजा; इयं याता = ज्येष्ठस्य लघोर्वा भ्रातुः पत्नी; इयं स्वसा भगिनी; इयं ननान्दा = स्वपत्युर्भगिनी ।

हिन्दी– ऋकारान्त मातृ, दुहितृ, यातृ या पोतृ, स्वसृ और ननान्दृ— ये पाँच शब्द ही स्त्रीलिंग में होते हैं; दूसरे नहीं । इनके अतिरिक्त दूसरे शब्दों के 'ऋन्नेभ्यः' इस सूत्र के द्वारा ङीप् विधान से ईकारान्त होने से स्वस्त्रादि का ही ङीप्-निषेध से ऋदन्त होने से, तिसृ-चतसृ का तो स्त्रीलिंग में आदेश होने से प्रकृतिरूपत्व के अभाव से ऋदन्त होने पर भी नियम व्याघात नहीं होगा ।

४. अन्यूप्रत्ययान्ता धातुः । अत्र द्वन्द्वगर्भो बहुव्रीहिसमासः ।

व्याख्या– अनिप्रत्ययान्तः ऊप्रत्ययान्तश्च धातुः स्त्रीलिङ्गे स्यात् । यथा इयमवनिः, सरणिः, रजनिरित्यादि; अत्र च कृदिकारादक्तिनः इति पक्षे ङीप् अवनी, रजनी चेत्यादि । ऊप्रत्ययान्तस्य चमूः = सेना, वधूरित्यादि । प्रत्ययान्तः किम् ? दिव्यतेः क्विप् द्यूः; अयं विशेष्यलिङ्गः ।

हिन्दी– अनिप्रत्ययान्त तथा ऊप्रत्ययान्त धातु से निष्पन्न शब्द स्त्रीलिंग होते हैं । जैसे— अरणिः, सरणिः, धरणिः, धमनिः, अशनिः, अवनिः आदि शब्द । ऊप्रत्ययान्त; जैसे— चमू, वधू इत्यादि ।

५. अशनिभरण्यरणयः पुंसि च । (अश्नुते संहति अश् + अनि), इतरेतर-द्वन्द्वसमासः ।

व्याख्या– एते अशनि-भरणि-अरणिशब्दाः स्त्रीलिङ्गाः पुंलिङ्गाश्च भवन्ति । अनि-प्रत्ययान्ततया स्त्रीत्वे प्राप्ते पाक्षिकपुंस्त्वविधानार्थं सूत्रम् । इयमयं वा अशनिः, भरणिः, अरणिः । स्त्रीत्वपक्षे ङीप् वा अशनीत्यादि ।

हिन्दी– अशनि, भरणि और अरणि— ये शब्द स्त्रीलिङ्ग तथा पुंलिङ्ग होते हैं । अनिप्रत्ययान्त होने के कारण स्त्रीत्व प्राप्त होने पर पुंस्त्वविधान के लिये यह सूत्र प्रवर्त्तित है ।

६. मिन्यन्तः । (अस्मिन् सूत्रे द्वन्द्वगर्भात्मको बहुव्रीहिसमासः) ।

व्याख्या– धातुरित्यनुवर्तते । मिप्रत्ययान्तः, निप्रत्ययान्तश्च धातुः स्त्रियां स्यात् ।

यथा— भूमिः, ग्लानिः, हानिः, धुनिः । अत्रापि विकल्पेन ङीप् तदा भूमी, ग्लानी, हानी, धुनी इत्यादि । भूमिः (भवन्त्यस्मिन् भूतानि भू + मि किच्च वा ङीप्) ।

हिन्दी– मिप्रत्ययान्त और निप्रत्ययान्त धातु से निष्पन्न शब्द स्त्रीलिंग होते हैं। जैसे— भूमि, ग्लानि, हानि, धुनि आदि । यहाँ भी विकल्प से ङीप् करने पर भूमी, ग्लानी, हानी, धुनी आदि शब्द होते हैं ।

७. वह्निवृष्ण्यग्नयः पुंसि । (अस्मिन् सूत्रे इतरेतरद्वन्द्वमासः) । (वह् + निः) वह्निः । वृषेः निः किच्च वृष्णिः । अङ्गति ऊर्ध्वं गच्छति, अङ्ग + नि नलोपश्च । इत्यत्र इतरेतर द्वन्द्वः विद्यते ।

व्याख्या– निप्रत्ययान्तत्वेन स्त्रीत्वे प्राप्ते तदपवादार्थमिदं सूत्रं प्रवर्तते । निप्रत्ययान्ताः वह्नि-वृष्णि-अग्नि इत्येते शब्दाः पुंलिङ्गे भवन्ति । यथा— अयं वह्निः, अयं वृष्णिः, अयमग्निरिति ।

हिन्दी– निप्रत्ययान्त वह्नि, अग्नि, वृष्णि— ये शब्द पुंलिङ्ग में ही व्यवहृत होते हैं। यहाँ निप्रत्ययान्त होने स्त्रीत्व प्राप्त है; किन्तु अपवादस्वरूप उक्त सूत्र प्रवर्त्तित होने पर पुंलिङ्ग ही है।

८. श्रोणियोन्यूर्मय पुंसि च । (अस्मिन् सूत्रेऽपि इतरेतरद्वन्द्वसमासः) श्रोणिः— णी- श्रोण् + इन् वा ङीप्, 'श्रोणीभारादलसगमना' (मेघदूत-८२), यु + नि = योनि, ऋ + मि अर्तेरुच्च = ऊर्मि ।

व्याख्या– उपर्युक्ताः श्रोणि-योनि-ऊर्मिशब्दाः स्त्रीलिङ्गाः पुंलिङ्गाश्च स्युः । एतेषां यथायोग्यं मिन्यन्तत्वेन प्राप्तौ विकल्पः । यथा— अयमियं वा श्रोणिः, अयमियं वा योनिः, तथैवोर्मिरपि । स्त्रीत्वपक्षे वा ङीप्— श्रोणी, योनी, ऊर्मी भविष्यति ।

हिन्दी– उपर्युक्त श्रोणि, योनि और ऊर्मि शब्द स्त्रीलिंग तथा पुंलिङ्ग दोनों में व्यवहृत होते हैं।

९. क्तिन्नन्तः । (अत्र बहुव्रीहिसमासः) क्तिन् + अन्तः ।

व्याख्या– क्तिन्प्रत्ययान्तो धातुः स्त्रियां = स्त्रीलिङ्गे भवति । यथा— कृतिः = (कृ + क्तिन्) 'स्वकृतिं गापयामास कविप्रथमपद्धतिम्' (रघुवंश-१५।३३) । क्तिन्प्रत्ययान्तो धातुः स्त्रियां स्यात् । यथा— इयं कृतिः, इयं बुद्धिः, इयं दृष्टिः । विशेषरूपेणात्र 'अक्तिनः' इति निर्देशात् अत्र न पक्षे ङीप् । 'स्त्रियां क्तिन्' (३।३।९४) इत्युत्तरकृदन्तसूत्रेणोक्तेऽर्थे प्रसक्तिः । स्त्रीलिङ्गे भावादौ क्तिन् स्यात् घञोऽपवादः । अजपौ तु परत्वाद्बाधेते कृतिरित्यादौ ।

हिन्दी– क्तिन्-प्रत्ययान्त धातु से निष्पन्न शब्द स्त्रीलिङ्ग होता है। जैसे— यह कृति, यह बुद्धि, यह दृष्टि आदि। महर्षि पाणिनि ने अष्टाध्यायी में स्वतन्त्र रूप से भी 'स्त्रियां क्तिन्' कहकर क्तिन्नन्त शब्दों का स्त्रीत्व स्वीकार किया है।

१०. ईकारानतश्च। ईकारान्तः च (बहुव्रीहिसमासः)।

व्याख्या– ईप्रत्ययान्तो धातुः स्त्रियां (स्त्रीलिङ्गे) स्यात्। चकारो धात्वधिकार-निवृत्यर्थः। एतत्सूत्रपर्यन्तमेव धातुरनुवर्तते, नाग्रिमसूत्रे। यथा— इयम् अवीः = अवत्यात्मानं लज्जया इति अव् + ई- रजस्वला स्त्री, इयम् तन्त्रीः = तन्त्रि-तन्त्री = तन्त्र् + इ = तन्त्रि + ङीष् तन्त्रीः = वीणा(का)यास्तारः, 'तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चित्' (मेघदूत-८६), इयं तरीः = तरिः-तरीः (तरति अनया- तृ + इ, तरि + ङीष्, नौका- 'जीर्णा तरिः सरिदतीव गभीरनीरा' (उद्भट, शि०-३।७६), इयं लक्ष्मीः— (लक्ष् + ई, मुट् + च) सौभाग्यम्, सा लक्ष्मीरुपकुरुते यया परेषाम्' (कि०-८।१८), 'अवीतन्त्रीतरीलक्ष्मी सुलोपो न कदाचन'।

हिन्दी– ई-प्रत्ययान्त धातु स्त्रीलिंग में होता है। यहाँ चकार धातु के अधिकारनिवृत्ति के लिये है। इसी सूत्र तक धातु का अनुवर्तन होता है, अग्रिम सूत्र में नहीं। जैसे— अवीः, तन्त्रीः, तरीः, लक्ष्मीः ये सभी स्त्रीलिंग में प्रयुक्त हैं।

११. ऊङ् ङ्याबन्तश्च। ऊङ् ङी आबन्तः च, (अत्र द्वन्द्वगर्भो बहुव्रीहिः)।

व्याख्या– अस्मिन् सूत्रे ङीब्-ङीष्-ङीनां ग्रहणाय ङीग्रहणं टाप्-चापोर्ग्रहणाय आपो ग्रहणम्। तथा च ऊङन्तः ङ्यन्तः आबन्तश्च शब्दः स्त्रीलिङ्गः स्यात्। अत्रायं निष्कर्षः— ऊङादीनां स्त्रियां विहितत्त्वेऽपि एकत्र सर्वेषां ग्रहणे लिङ्गज्ञानस्य सुगमतार्थमित्यत्र ग्रहणम्। एवमन्यत्रापि। ऊङन्तः शब्दो यथा— कुरूः (कृ + कु उकारादेश)। उदाहरणम्— 'श्रियः कुरूणामधिपस्य पालनीम्' (किरात-१।१), कर्कन्धूः (कर्कं कण्टकं दधाति) धा + कृ)। उदाहरणम्— 'कर्कन्धूफलपाकमिश्रपचनामोदः परिस्तीर्यते' (उत्तररामचरित-४।१)। ङीप्रत्यये यथा— कर्त्री (कर्तृ + ङीप्), इयं गौरी (गौर + ङीष्), 'अष्टवर्षा भवेद्गौरी' 'गौरीगुरोर्गह्वरमा-विवेश' (रघुवंश-२।२६), इयं ब्राह्मणी = (ब्राह्मण + ङीष्)। आबन्तस्य यथा— विद्या (इयं) (विद् + क्यप् + टाप्)। उदाहरणं— 'विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्' (भर्तृहरि-२।२०)। एवमेव भिदा, त्वरा, जरादयः टाबन्ताः स्त्रीलिङ्गाः शब्दाः भविष्यन्ति।

हिन्दी– ऊङ् प्रत्ययान्त शब्द, जैसे— कुरू, कर्कन्धू; ङी (ङीप्-ङीष्-

ङीन्) प्रत्ययान्त शब्द, जैसे— कर्त्री, गौरी, ब्राह्मणी आदि तथा आबन्त— विद्या, भिदा, त्वरा, जरा आदि शब्द स्त्रीलिङ्ग होते हैं ।

१२. य्वन्तमेकाक्षरम् । यू अन्तम् एकाक्षरम् । अत्र द्वन्द्वगर्भो बहुव्रीहिः, यथा— ई च ऊ चेति यू, यू अन्ते यस्य तत् = य्वन्तम् ।

व्याख्या– एकाक्षरः ईकारान्तः ऊकारन्तश्च असति विशेषे स्त्रीलिङ्गः स्यात् । तत्र ईकारान्तो यथा— श्रीः, 'साहसे श्रीः प्रतिवसति' (मृच्छ०-४), ऊकारान्तश्च यथा— भूः = भू + क्विप् = पृथ्वी, उदाहरणं यथा— 'मत्तेव कुम्भदलने भुवि सन्ति शूराः' । अत्र दीव्यतेः क्विपि तु विशेषलिङ्गता । एकाक्षरं किम् ? बहुव्रीहौ— पृथुश्रीः, प्राप्तभूः विशेष्यलिङ्ग एव ।

हिन्दी– एक अक्षर वाला, चाहे वह ईकारान्त हो अथवा ऊकारान्त, किसी विशेष सूत्र द्वारा विना निर्देश के भी स्त्रीलिङ्ग होता है । ईकारान्त यथा— श्री, ऊकारान्त यथा— भू आदि । सूत्र में एकाक्षर (एक अक्षर वाला) कहने का प्रयोजन यह है कि पृथुश्री, प्राप्तभू आदि बहुव्रीहि समास में विशेष्यलिङ्ग होगा ।

१३. विंशत्यादिरानवतेः । विंशतिः आदिर्यस्य स विंशत्यादिः (बहुव्रीहिः), आनवतेः = नवतिपर्यन्तम्, 'आङ् मर्यादाभिविध्योरि'ति बलात् ।

व्याख्या– विंशतिसंख्याप्रभृतयः नवतिसंख्यापर्यन्ताः सङ्ख्यासङ्ख्येयवाचकाः स्त्रियां (स्त्रीलिङ्गे) स्युरिति । यथा— इयं विशतिः = द्वे दश परिमाणमस्य नि० सिद्धिः । एवमेव त्रिंशत्, चत्वारिंशत्, पञ्चाशत्, षष्टिः, सप्ततिः, अशीतिः, नवतिः संख्याशब्दाः स्त्रीलिङ्गाः भवन्ति । कृदिकारान्तत्वाभावात् विंशत्यादिभ्यो न ङीप् । एकविंशत्यादेस्तु 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' इति स्त्रीत्वमेव एकनवत्यादेः नवतिलिङ्गानतिवृत्तेर्न विधित्व-व्याघातः । आनवतेः किम् ? शतं सहस्रम् । विंशत्यादयः किम् ? एकादशादेर्विशेष्य-लिङ्गत्वम् ।

हिन्दी– विंशति (बीस) से लेकर नवति (नब्बे) संख्यापर्यन्त संख्येय शब्द स्त्रीलिंग होते हैं । यथा- विंशति, त्रिंशत्, चत्वारिंशत् आदि शब्द ।

१४. दुन्दुभिरक्षेषु । दुन्दुभिः अक्षेषु (दुन्दु इत्यव्यक्तशब्देन भाति, भा + कि) ।

व्याख्या– अक्षार्थको दुन्दुभिशब्दः स्त्रीलिङ्गः स्यात् । यथा— इयं दुन्दुभिः, पक्षे ङी- दुन्दुभी इत्यपि । अक्षादन्यत्र न स्त्रीत्वं तत्र पुंस्त्वमेव, यथा— 'विजयदुन्दुभितां ययुरर्णवाः' (रघुवंश-९।११) । अत्र पुंस्त्वम् ।

हिन्दी– दुन्दुभि शब्द का यदि अक्ष (जुआ) अर्थ में प्रयोग किया जाय तो वह स्त्रीलिङ्ग होता है; लेकिन यदि उससे किसी भिन्न अर्थ में प्रयोग हो तो वहाँ वह पुंल्लिङ्ग ही होगा ।

१५. नाभिरक्षत्रिये । नाभिः अक्षत्रिये, (नह् + इञ् भश्चान्तादेशः = नाभिः) ।

व्याख्या– क्षत्रियार्थकभिन्नो नाभिशब्दः स्त्रीलिङ्गः स्यात् । एतावता सूच्यते यत् क्षत्रियार्थकभिन्नस्य नाभिशब्दस्य पुंस्त्वं सिद्ध्यति । कथनस्याभिप्रायोऽयं यदस्य शब्दस्य द्वयोर्लिङ्गयोः शक्तिः अक्षत्रिये नाभिशब्दे स्त्रीलिङ्गः, अन्यत्र पुंलिङ्ग इति भावः । यथा— इयं नाभिः (अक्षावयवः) वा ङीप्— नाभी । वैशिष्टयञ्चात्र— बहुव्रीहि-समासान्ते प्रयुक्तो नाभि-शब्दः परिवर्त्य 'नाभ' इति भवति । यथा— पद्मनाभः ।

हिन्दी– क्षत्रिय से भिन्न अर्थवाचक 'नाभि' शब्द स्त्रीलिंग होता है । इससे यह ज्ञात होता है कि क्षत्रियार्थक-भिन्न 'नाभि' शब्द पुंलिङ्ग सिद्ध होता है । कहने का अभिप्राय यह है कि इस शब्द का दोनों लिङ्गों में प्रयोग होता है । निष्कर्ष यह है कि— क्षत्रियार्थक नाभि शब्द स्त्रीलिङ्ग और अन्यत्र पुंलिङ्ग होता है । जैसे— इयं (स्त्रीवाचक) नाभिः । विकल्प से ङीप् होने पर 'नाभी' होता है । साथ ही इसकी एक विशेषता यह भी है कि बहुव्रीहि समास के अन्त में प्रयुक्त 'नाभि' शब्द बदल कर 'नाभ' हो जाता है, जैसे— पद्मनाभ ।

१६. उभावन्यत्र पुंसि । उभौ अन्यत्र पुंसि ।

व्याख्या– उभौ = दुन्दुभि-नाभिशब्दौ क्रमेण नाभिभिन्ने क्षत्रिये च वर्त्तमानौ पुंल्लिङ्गौ स्याताम् । यथा— अयं दुन्दुभिः (वाद्यभेदः असुरभेदो वा), अयं नाभिः (क्षत्रियः) । 'लिङ्गमशिष्यं लोकाश्रयत्वात्' इत्युक्तेः क्वचिद् व्यभिचारः । तेन अवयववाचकस्य पुंस्त्वमपि, यथा— 'समुल्लसत्पङ्कजपत्रकोमलैरुपाहितश्रोण्युपनीविनाभिभिः' । अत एव पुंस्त्वम् । अत एव रभसः = उग्रता-शीघ्रता-वेग-आतुरतादयः । तथा च 'आलीषु केलीरभसेन बाला मुहु-र्ममालापमपालयन्ती' (भामिनी०-२।१२) । 'मुख्यराट् क्षत्रिये नाभिः पुंसि प्राण्यङ्गके द्वयोः । चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिका मदे' ॥ इति कथ्यते ।

हिन्दी– उपर्युक्त दोनों– दुन्दुभि और नाभि शब्द क्रम से नाभिभिन्न में तथा क्षत्रिय अर्थ में वर्तमान रहने पर पुंल्लिङ्ग होते हैं । जैसे— अयं दुन्दुभिः (वाद्यभेद अथवा असुर-भेद), अयं नाभिः (पुंल्लिङ्ग– क्षत्रिय) अर्थ में पुंल्लिङ्ग होते हैं ।

१७. तलन्तः । तल् + अन्तः = तलन्तः, तल् अन्ते यस्यासौ तलन्तः (बहुव्रीहिः) ।

व्याख्या– भावाद्यर्थे विहिततल्प्रत्ययान्तः शब्दः स्त्रीलिङ्गः स्यात् । यथा— शुभ्रस्य भावः शुभ्रता; एवमेव जडता, मृदुता । शुभ्रता = शुभ् + रक् + ता । जडता = जड + तल् + टाप्, मृदुता = मृद् + कु + तल् + टाप्; 'महर्षिमृदुतामगच्छत्' (रघुवंश-५।५४) । ब्राह्मणस्य कर्म भावो वा ब्राह्मणता, जनानां समूहो जनता, ग्रामता । देव एव देवता 'स्वार्थिका अपि प्रत्ययाः क्वचित्प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते' इत्युक्ते प्रकृतिभिन्नलिङ्गत्वम्भवति ।

हिन्दी– भाव आदि अर्थ में प्रयुक्त तल् प्रत्ययान्त शब्द स्त्रीलिङ्ग होते हैं । जैसे— शुभ्र (सफेद) का भाव शुभ्रता = स्वच्छता । इसी प्रकार जड का भाव जडता, मृदु का भाव मृदुता, ब्राह्मण का कर्म अथवा भाव ब्राह्मणता, जनों का समूह जनता, ग्रामता, देव ही देवता होते हैं । सर्वत्र स्त्रीलिङ्ग होते हैं । 'स्वार्थिक प्रत्यय भी कहीं प्रकृति से लिङ्ग तथा वचन का अतिक्रमण कर जाते हैं' ऐसा कहने पर प्रकृतिभिन्न लिङ्गत्व होता है ।

१८. भूमिविद्युत्सरिल्लतावनिताभिधानानि । अत्र द्वन्द्वगर्भात्मकस्तत्पुरुषसमासः । भूमि— भवन्त्यस्मिन् भूतानि— भू + मि + किच्च वा ङीप्, विद्युत्— विशेषेण द्योतते— वि+ द्युत् + क्विप् 'वाताय कपिला विद्युत्' (महा०-५।१९), सरित्— सृ + इति 'अन्या सरितां शतानि हि समुद्रगाः प्रापयन्त्यब्धिम्' (माल०-५।१९), लता— लत् + अच् + टाप् 'लतेव सन्नद्धमनोज्ञपल्लवा'; वनिता— वन + क्त + टाप् 'वनेचराणां वनितासखानाम्' ।

व्याख्या– भूम्यादिपर्य्यायवाचकशब्दाः स्त्रीलिङ्गाः भवन्ति । इयमचला, अनन्ता, विश्वम्भरा आदयः । इयं विद्युत्, तडित्, सौदामनी, चपला, चञ्चलेत्यादयः । इयं सरित्, निम्नगा, आपगा । इयं लता, वल्ली, वल्लरी, व्रततिः । इयं वनिता, योषित्, अबलेत्यादयः शब्दाः स्त्रीलिङ्गाः भवेयुरिति ।

हिन्दी– भूमि आदि के पर्यायवाचक शब्द भी स्त्रीलिङ्ग होते हैं, जैसे— भूमि के पर्यायवाचक अचला, अनन्ता, विश्वम्भरा आदि । विद्युत् के तडित्, सौदामनी, चपला, चञ्चला आदि । सरित् के निम्नगा, आपगा । लता के वल्ली, वल्लरी, व्रतति और वनिता के योषित्, अबला आदि शब्द भी स्त्रीलिङ्ग होते हैं ।

१९. यादो नपुंसकम् । (यान्ति वेगेन— या + असुन् + दुगागमः, यादांसि जल-जन्तवः) 'वरुणो यादसामहम्' (गीता-१०।२९) ।

व्याख्या– यादस्-शब्दः सरिद्वाचकोऽपि नपुंसकलिङ्गः स्यात् । पूर्वसूत्रापवादः । यथा— इदं यादः (नदी) ।

हिन्दी– यादस् शब्द नदीवाचक भी नपुंसकलिङ्ग होता है । यह पूर्व सूत्र का अपवाद-स्वरूप है । जैसे— इदं (नपुंसक) यादः (नदी) ।

२०. भास्स्रुक्स्रग्दिग्दृगुष्णिगुपानहः । (अत्र इतेरतरद्वन्द्वसमासः) । भास् + क्विप् 'दृशां निशेन्दीवरचारुभासा' (नैषध-२२।४३) । भास् स्रुक स्रग् दिग् दृग् उष्णिक् उपानत् (हः) ।

व्याख्या– उपर्युक्ताः शब्दाः स्त्रीलिङ्गवाचकाः भवन्ति । इयं भाः = कान्तिः, स्रुक् = स्रुवः, दिक् = काष्ठा, उष्णिक् = वैदिकछन्दोविशेषः, उपानत् = पादत्राणम् ।

हिन्दी– उपर्युक्त भास्, स्रुक्, स्रग्, दिग्, दृग्, उष्णिक्, उपानत्— ये शब्द स्त्रीलिङ्ग में होते हैं ।

२१. स्थूणोर्णे नपुंसके च । स्थूणा-ऊर्णे-नपुंसके च; स्था + नक् उदन्तादेशः, पृषो०, ऊर्ण + टाप् ।

व्याख्या– स्थूणा-ऊर्णाशब्दौ स्त्रीलिङ्गे चात् नपुंसके च स्तः । यथा— इयं स्थूणा– इदं स्थूणम् (काष्ठमयी द्विकर्णिका), ऊर्णा (इयं), इदं स्थूणमिति । (मेषादि लोम) ।

हिन्दी– ऊपर निर्दिष्ट स्थूणा और ऊर्णा शब्द स्त्रीलिङ्ग और नपुंसक लिङ्ग में होते हैं ।

२२. गृहशशाभ्यां क्लीबे । (इतरेतरद्वन्द्वसमासः) । ग्रह + क = गृह, शश् + अचः = शशः) ।

व्याख्या– स्थूणाशब्दः गृहपूर्वकः शशपूर्वकश्च ऊर्णाशब्दः क्लीब(नपुंसक)लिङ्ग एव स्यात्, न तु स्त्रियाम् । परवल्लिङ्गतापवादः । यथा— गृहस्थूणम्, शशोर्णम् । 'न गृहं गृहमित्याहुः गृहिणी गृहमुच्यते' (पञ्च०-४।८१) ।

हिन्दी– गृहपूर्वक 'स्थूणा' शब्द तथा शशपूर्वक 'ऊर्णा' शब्द नपुंसकलिङ्ग में ही हो, स्त्रीलिङ्ग में नहीं । जैसे— गृहस्थूणम्, शशोर्णम् (नपुंसक) हैं ।

२३. प्रावृड्विप्रुड्रुड्विट्त्विषः । (इतरेतरद्वन्द्वसमासः) । प्रावृड्— प्र + आ + वृष् + क्विप् 'प्रावृट् प्रावृडिति ब्रवीति शठधी क्षारं क्षते प्रक्षिपत्' (मृच्छकटिक-५।१८) । विप्रुड्— वि + प्रुष् + क्विप् 'नवजलविप्रुषो गृहीत्वा' (शिशुपाल-

८।४०)। रुड्— रुष् + क्विप् 'निर्बन्धसञ्जातरुषा' (रघुवंश-५।२१)। विट्— विष् + क्विप्। त्विषः— त्विष् + क्विप् 'चयत्विषामित्यवधारितं पुरा' (शिशुपाल-१।३)।

व्याख्या– एते पूर्वोक्ताः शब्दाः स्त्रीलिङ्गे स्युः। यथा— इयं प्रावृट्, इयं विप्रुट्, इयं रुट्, इयं विट्, इयं त्विट् च।

हिन्दी– उपर्युक्त सूत्र में कथित प्रावृट् (प्रावृष्), विप्रुट् (विप्रुष्), रुट् (रुष्), विट् (विष्) और त्विट् (त्विष्) शब्द स्त्रीलिङ्ग में होते हैं।

२४. दर्विविदिवेदिखनिशाण्यभ्रिवेणिकृष्योषध्यङ्गुलयः। (अस्मिन् सूत्रे इतरेतर-द्वन्द्वसमासः) दर्वि, विदि, वेदि, खनि, शाणि, अभ्रि, वेणि, कृषि, ओषधि, अङ्गुलि—)।

व्याख्या– उपर्युक्ताः एते शब्दाः स्त्रीलिङ्गाः स्युरिति। पक्षे ङीप्। यथा— इयं दर्विः, विदिः, वेदिः, खनिः, शाणिः, अभ्रिः, वेणिः, कृषिः, ओषधिः, अङ्गुलिः (सर्वत्र पूर्वमियमिति योज्यम्)। पक्षे ङीप् सर्वत्र, यथा— दर्वीकरः, 'अङ्गुलीवोरगक्षता' इति कालिदासः।

व्युत्पत्तिः– दर्वि–दर्वी— दृ + विन् + वा ङीष्। विदि (श्)— दिग्भ्यो विगता, वेदिः–वेदी— विद् + इन्, पक्षे ङीप् 'मध्येन सा वेदिविलग्नमध्या' (कुमारसम्भव-१।३७)। खनिः–नी— खन् + इ, स्त्रियां ङीष्। शाणि— शण् + इण्। अभ्रि–भ्री— अभ्र + इन् ङीष् वा। अश्रि पाठे— अश् + क्रि, पक्षे ङीष् 'वृत्रस्य हन्तुः कुलिशं कुण्ठिताश्रीवलक्ष्यत' (कुमारसम्भव-२।३०)। वेणिः–णी— वेण् + इन् ङीप् वा, 'तरङ्गिणी वेणिरिवायता भुवः' (शिशुपाल-१२।७५)। कृषिः— कृष् + इक् 'चीयते बालिशस्यापि सत्क्षेत्रपतिता कृषिः' (मुद्राराक्षस-३)। ओषधिः–धी— ओष + धा + कि, स्त्रियां ङीष्। अङ्गुलि— अङ्ग + उलिः।

हिन्दी– उपर्युक्त दर्वि, विदि, वेदि, खनि, शाणि, अभ्रि, वेणि, कृषि, ओषधि और अङ्गुलि शब्द स्त्रीलिङ्ग होते हैं; पक्ष में सर्वत्र ङीप् होता है। अतः 'दर्वीकर' आदि प्रयोग सिद्ध होते हैं।

२५. तिथिनाडिरुचिवीचिनालिधूलिकिकिकेलिच्छविरात्र्यादयः। अत्र बहुव्रीहि-सम्पृक्तो द्वन्द्वसमासः।

व्याख्या– एते शब्दाः स्त्रीलिङ्गाः स्युः। तत्रादौ तिथिः— अत् + इथिन्, (पृषो०) पक्षे ङीप्। नाडि— नड् + णिच् + इन्। रुचि— रुच् + कि 'रुचिमिन्दुदले करोत्यजः परिपूर्णेन्दुरुचिर्महीपतिः' (शिशुपाल-१६।७१)। वीचि— वे + ईचि

डिच्च, वीचि + ङीष् 'समुद्रवीचीवचलस्वभावाः' (पञ्च०-१।१९४)। नालि— नल् + णिच् + इनि, नालि + ङीष्। धूलि— धू + लि वा०, धूलि + ङीष्, 'अनीत्वा पङ्कतां धूलिमुदकं नावतिष्ठते' (शिशुपाल-२।३४)। किकि— कक + इन् (पृषोदरादित्वात् इत्वम्)। केलि— केल् + इन्, 'केलिचलन्मणिकुण्डल' (गीत०-१)। छवि— छयति असारं छिनत्ति तमो वा— छो + वि + किच्च वा ङीप्। रात्रि— राति सुखं भयं वा, रा + त्रिप् वा ङीप् 'रात्रिर्गता मतिमतां वर मुञ्च शय्याम्' (रघुवंश-५।६३)।

हिन्दी– उपर्युक्त तिथि, नाडि, रुचि, वीचि, नालि, धूलि, किकि, केलि, छवि और रात्रि तथा उसके पर्यायवाचक शब्द स्त्रीलिङ्ग होते हैं; जैसे— निशा, निशीथनी, क्षणदा, क्षपा आदि। साथ ही तिथि से रात्रिपर्यन्त शब्दों में ङीप् विधान से दीर्घ होकर रात्री, तिथी, वीची इत्यादि भी होते हैं।

२६. शष्कुलिराजिकुट्यवन्तिवर्त्तिभ्रुकुटित्रुटिबलिपङ्क्तयः। अस्मिन् सूत्रे इतरेतर-द्वन्द्वसमासः, शष्कुलिश्च पङ्क्तिश्चेति।

व्याख्या– शष्कुलि-ली— शष् (स्) + कुलच् + ङीष्, 'अवलम्बितकर्णशष्कुली कलसीकं रचयन्नवोचत्' (नैषध-२।८)। राजि-जी— राज् + इन् + ङीप्, 'सर्वं पण्डितराजराजितिलकेनाकारि लोकोत्तरम्' (भामिनी०-४।४४)। कुटि-टी— कुट् + इन्। अवन्ति-न्ती— अव + झिच्, पक्षे ङीष्। वर्त्ति-र्त्ती— वृत् + इन् वा ङीप्, 'कर्पूरवर्त्तिरिव लोचनतापहन्त्री' (भामिनी०-३।१६)। भ्रुकुटि-टी— भ्रुवः कुटिः कौटिल्यम् (षष्ठी तत्पुरुषः)। त्रुटि-टी— त्रुट् + इन् कित्, त्रुटि + ङीष्। बलि— बल् + इन्। पङ्क्ति— पंच् + क्तिन्, 'दृश्येत चारुपदपङ्क्तिरलक्तकाङ्का' (विक्रम०-४।६)।

एते शब्दाः स्त्रियां स्युः। इयं शष्कुलिः, राजि इत्यादि। सर्वेभ्यः शब्देभ्यः पक्षे ङीप्।

हिन्दी– सूत्रनिर्दिष्ट शष्कुलि-ली आदि सभी शब्द स्त्रीलिङ्गवाचक होते हैं।

२७. प्रतिपदापद्विपत्संपच्छरत्संसत्परिषदुषःसंवित्क्षुत्पुन्मुत्समिधः। 'प्रतिपदापद् ....समिधः' अत्रेतरेतरद्वन्द्वसमासः।

व्याख्या– प्रतिपत्, आपत्, विपत्, संपत्, शरत्, संसत्, परिषत्, उषस्, संवित्, क्षुत्, पुत्, मुत्, समित् इत्येते शब्दाः स्त्रीलिङ्गवाचकाः भवन्ति। यथा— इयं प्रतिपत्— प्रति + पद् + क्विप् 'प्रतिपच्चन्द्रनिभोऽयमात्मजः' (रघुवंश-८।६५)। इयमापद्— आ + पद् + क्विप् 'दैवीनां मानुषीणाञ्च प्रतिहर्ता त्वमापदाम्' (रघुवंश-१।६०)। इयं सम्पद्— सम् + पद् + क्विप् 'नीताविवोत्साहगुणेन सम्पद्' (कुमार०-

१।२२)। अनेनैव प्रकारेण शरदादयः शब्दा अपि स्त्रियामेव स्युरिति । उषस्— उष् + असि 'प्रदीपार्चिरिवोषसि' (रघुवंश-१२।१), 'उषा' प्रातरधिष्ठात्री देवता, ओषत्यन्धकार- उष + क, 'उषा उशन्ति' इति वेदमन्त्रः ।

हिन्दी– इस सूत्र में कथित प्रतिपत्, आपत्, विपद्, संपत्, शरत्, संसत्, परिषत्, उषस्, क्षुत्, पुत्, मुत्, समित्— ये शब्द स्त्रीलिङ्गवाचक होते हैं ।

२८. आशीर्धूः पूर्गीर्द्वारः । (इत्यत्रेतरेतरद्वन्द्वसमासः)।

व्याख्या– आशीः, धूः, पूः, गीः, द्वाश्चेते शब्दाः स्त्रियां (स्त्रीलिङ्गवाचकाः) भवन्ति । यथा— इयमाशीः (शीः, शीभ्याम् आदि)— आ + शास् + क्विप्- इत्वम्) । धूः— धू + क्विप् । द्वार् (द्वाः)— द्वृ + णिच् + विच् ।

हिन्दी– आशीः, धूः, पूः, गीः और द्वाः— ये शब्द स्त्रीलिङ्गवाचक होते हैं।

२९. अप्सुमनस्समासिकता वर्षाणां बहुत्वञ्च । (सूत्रेऽस्मिन्नितरेतरद्वन्द्वसमासः)। अप्-सुमनस्-समा-सिकता-वर्षाणां बहुत्वं चेत्यन्वयः ।

व्याख्या– अप्प्रभृतीनां पञ्चानां स्त्रीत्वं बहुवचनान्तत्वञ्च स्यात् । अप्— आप् + क्विप् + ह्रस्वश्च । परिनिष्ठितभाषायां केवलं बहुवचने एव प्रयोगः, 'अप एव ससर्जादौ तासु बीजमवासृजत्' (मनु०-१।८) । सुमनस्— सु + डु + मनस्, 'किं सेव्यते सुमनसां मनसापि गन्धः कस्तूरिकाजननशक्तिभृता मृगेण' रस० (शिशुपाल-६।६६)। समा— सम् + अच् + टाप् । प्रायो बहुवचने एव प्रयोगः; किञ्च महर्षिणा पाणिनिना एकवचनेऽपि प्रयुक्तः, यथा— समां-समाम् (पा०-५।२।१२), 'तेनाष्टौ परिगमिताः समाः कथञ्चित्' (रघुवंश-८।१२) । सिकता— सिक + अतच् + टाप् । प्रायो बहुवचने प्रयोगः, 'लभेत् सिकतासु तैलमपि यत्नतः पीडयन्' (भर्तृहरिशतक-२।५)। वर्षा— वृष् + अच् + टाप् । प्रायः बहुवचने 'वर्षासु स्थण्डिलेशयः' (याज्ञ०-३।५२) । यथा— इमाः आपः, इमा सुमनसः, पुष्पसामान्यवाचित्व एवास्य बहुत्वं, तेन 'सुमना मालती जातिः' इत्यादावेकत्वम् । देववाचकस्य तु पुंस्त्वमेव । बहुत्वं चैषां प्रायिकम् । अत एव अर्थवत्सूत्रभाष्ये 'एकाच सिकता तैलदाने असमर्था' इति प्रयुक्तम् । 'विभाषा पाघ्राधेट्' इति सूत्रवृत्तिव्याख्यायाम् 'आघ्रासातां सुमनसौ' इति हरदत्तेन प्रयुक्तम् ।

हिन्दी– उपर्युक्त पाँच शब्द— अप्, सुमनस्, समा, सिकता और वर्षा नित्य बहु-वचनान्त तथा स्त्रीलिङ्ग में होते हैं । कहीं-कहीं पुष्पविशेष में 'सुमना' एकवचन भी प्रयुक्त है । देववाचकत्व में पुंस्त्व लिङ्ग होता है ।

३०. स्रक्त्वग्ज्योग्वाग्यवागूनौ स्फिचः । क्वचित् स्रुक्, स्फिजः इति पाठः । स्रक्....स्फिचः इत्यत्र इतरेतरद्वन्द्वसमासः । शुक त्वग् ज्योग् वाग् यवागू नौ स्फिचः(जः) इत्यपि पाठः ।

व्याख्या– शुक्-स्रुक्- (भ्वादि-परस्मैपद— शोकति), सृज्यते— सृज् + क्विन् + नि । त्वग्— त्वच् + क्विप् । वाग् (वाच्)— वच् + क्विप्, 'दीर्घोऽसम्प्रसारणञ्च' । यवागू— (यूयते = मिश्र्यते— यु + आगू) 'यवागू विरलद्रवा' (सुश्रुत) । नौः— नुद्यते अनया— नुद् + डौ 'महता पुण्यपण्येन क्रीतेयं कायनौस्त्वया' (शाकुन्तल-३।१) । स्फिचः (स्फिजः)— स्फाय + डिच् 'अंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्र-पूतानि जग्ध्वा' (मा०-५।१६) । अत्र विवृताः शब्दाः स्त्रियां = स्त्रीलिङ्गे स्युरिति ।

हिन्दी– उपर्युक्त विवेचित शुक् अथवा स्रुक्, त्वग्, ज्योग्, वाग्, यवागू, स्फिच् अथवा स्फिज् शब्द स्त्रीलिङ्गवाचक होते हैं ।

३१. तटिसीमासम्बध्याः । क्वचित् 'तृटि' इत्यपि पाठः । इतरेतरद्वन्द्वसमासः ।

व्याख्या– तटि अथवा तृटि, सीमा, सम्बध्या एते शब्दाः स्त्रीलिङ्गवाचकाः भवन्ति । तद्यथा— तटिस्थाने कोशे 'तटिनी'शब्दः, तटमस्त्यस्या इति ङीप्; 'कदा वाराणस्याममरतटिनी रोधसि वसन्' (भर्तृ०-३।१२३) । सीमा— सीमन् + डाप्, 'सीमां प्रति समुत्पन्ने विवादे' (मनु०-८।२४५) । सम्बध्या— सम् + बंध + क्त + ल्यप् + टाप् ।

हिन्दी– उपर्युक्त तटि या तटिनी अथवा तृटि, सीमा और सम्बध्या शब्द स्त्रीलिङ्गी होते हैं ।

३२. चूल्लिवेणिखार्यश्च । क्वचित्पुस्तके 'चुल्लि' इति पाठः । चूल्लि (चुल्लि) वेणि खार्यः च (इतरेतरद्वन्द्वसमासः) ।

व्याख्या– चुल्लि— चुल्ल + इन्, वेणि-वेणी— वेण् + इन् ङीप् वा, 'तरङ्गिणी वेणिरिवायतो भुवः' 'वनान्निवृत्तेन रघूत्तमेन मुक्ता स्वयं वेणिरिवाबभासे' (रघुवंश-१४।१२) । खारः— खारिः-खारी (स्त्री)— खम् = आकाशम् आधिक्येन ऋच्छति— ख + ऋ + अण्, ख + आ + रा + क + ङीष् वा ह्रस्वः । एते चूल्लि-वेणि-खारि(री)शब्दाः स्त्रियां स्युः । इयं चूल्लिः, इयं वेणिः, इयं खारिः; पक्षे ङीष् ।

हिन्दी– उपर्युक्त चूल्लि (चुल्लि), वेणि और खारि (री) शब्द स्त्रीलिङ्ग में होते हैं अर्थात् स्त्रीलिङ्गवाचक होते हैं ।

३३. ताराधाराज्योत्स्नादयश्च । तारा, धारा, ज्योत्स्ना आदयः च (बहुव्रीहि-सम्पृक्तो द्वन्द्वसमासः) ।

व्याख्या– तारा— तार + टाप् 'हंसश्रेणीषु तारासु' (रघुवंश-४।१९) । धारा— धार + टाप् 'ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति' (शाकुन्तल-१।९८) । ज्योत्स्ना— ज्योतिरस्ति अस्याम्— ज्योतिस् + न, उपधालोपः 'स्फुरत्स्फार-ज्योत्स्नाधवलिततले क्वापि पुलिने' (भर्तृ०-३।४२) । एते तारा-धारा-ज्योत्स्ना-शब्दाः स्त्रियां (स्त्रीलिङ्गे) स्युः ।

हिन्दी– उपर्युक्त तारा, धारा और ज्योत्स्ना शब्द स्त्रीलिङ्गी होते हैं ।

३४. शलाका स्त्रियां नित्यम् ।

व्याख्या– शलाका (शल् + आकः टाप् 'अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया । चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः ॥' शिक्षा-५८) शब्दो नित्यस्त्रीलिङ्गः । यथा— इयं शलाका ।

विशेषनिर्वचनम्– स्त्रीत्यधिकारे पुनः स्त्रीग्रहणमधिकारनिवृत्त्यर्थम् । नित्यग्रहणमन्येषां व्यभिचारसूचनार्थम् । यत्र यत्र च व्यभिचारः तत्तत् पूर्वमुक्तम् ।

हिन्दी– 'शलाका' शब्द नित्य स्त्रीलिङ्ग होता है । यहाँ इस स्त्रीलिङ्गाधिकार में पुनः इस सूत्र में 'स्त्री' ग्रहण अधिकार के निवृत्ति को सूचित करता है और 'नित्य' ग्रहण व्यभिचार (अन्य लिङ्ग में नहीं) सूचनार्थ है । जहाँ कहीं व्यभिचार (अन्य लिङ्ग में प्रयोग) सम्भव है, वहाँ वह पूर्व में ही सूचित कर दिया गया है ।

विशेष– यहाँ सूत्रपाठ आदि के अनुसार कुछ अवशिष्ट विषय सूचित किया जाता है । 'स्त्रियां क्तिन् (३।३।९४) सूत्र के अधिकार में जो विहित क्यप् आदि प्रत्यय हैं, उनके अन्त वाले शब्द भी स्त्रीलिङ्ग में होते हैं; जैसे— व्रज और यज धातु से भाव में क्यप् प्रत्यय करने पर (३।३।९८ सूत्र) 'प्रव्रज्या' और 'इज्या' सिद्ध होते हैं, वे स्त्रीलिङ्ग होते हैं ।

'संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः' (३।३।९९) के प्रयोग से समज्या, समा, निषद्या, आपण, निषद्या— पिच्छिला भूमि, मन्या— गलपार्श्वशिरा, विद्या, सत्या— अभिषव, शय्या, भृत्या, शिविका आदि; 'कृञः श च' (३।३।१००)— क्रिया, इच्छा (३।३।१०१) इच्छा वहीं पठित 'परिचर्यापरिसर्य्यामृगयाटाट्या-नामुपसंख्यानम्' वार्त्तिक के अनुसार परिचर्या = पूजा, परिसर्या, मृगया, अटाट्या

आदि स्त्रीलिङ्ग होते हैं। इसी प्रकार 'जागर्त्तेरकारो वा' (वार्त्तिक)— जागरा, जागर्या। 'अप्रत्ययात्' (३।३।१०२) सूत्रोदाहरण— जिगमिषा, विविदिषा, पुत्रकाम्या। 'गुरोश्च हलः' (३।३।१०३)— ईहा, ऊहा, मूर्च्छा। 'षिद्भिदादिभ्योऽङ्' (३।३।१०४) सूत्रोदाहरण— जरा, त्रपा, लज्जा, भिदा, छिदा। 'चिन्तिपूजिकाथकुम्बिचर्चश्च' (३।३।१०५)— चिन्ता, पूजा, कथा, कुम्बा, चर्चा। 'आतश्चोपसर्गे' (३।३।१०६)— उपधा, उपमा, उपदा। 'श्रदन्तरोरुपसङ्ख्यानम्' (वार्त्तिक)— श्रद्धा, अन्तर्द्धा। 'ण्यास-श्रन्थो युच्' (३।३।१०७)— कारणा, यातना, पीड़ना, आसना, श्रन्थना। 'घट्टिवन्दि-विदिभ्यश्च' (वार्त्तिक)— घट्टना, वन्दना, वेदना। 'इषेरनिच्छार्थस्य' (वार्त्तिक)— अन्वेषणा। 'परेर्वा' (वार्त्तिक)— पर्येषणा। 'रोगाख्यायां ण्वुल् बहुलम्' (३।३।१०८)— प्रच्छर्दिका, प्रवाहिका, विचर्चिका। 'धात्वर्थनिर्देशे ण्वुल्वक्तव्यः' (वार्त्तिक)— आसिका, शायिका। 'संज्ञायाम्' (३।३।१०९)— उद्दालपुष्पभञ्जिका। 'विभाषाख्यानपरिप्रश्नयोरिञ् च' (३।३।११०)— 'कां कारिं, कारिकां, क्रियां, कृत्यां, कृतिं वा त्वम-कार्षीरिति' ऐसे प्रश्न में 'सर्वां कारिं कारिकां वाऽकार्षम्' उत्तर होगा। इसी प्रकार गणिं, गणिकां, गणनाम्। पाचिं पाचिकां, पचां, पंक्तिम्। (इत्यादयोऽनेके शब्दाः) इत्यादि अनेक शब्द सूत्रनिर्देशानुसार स्त्रीलिङ्ग में व्यवहृत हैं; जो यहाँ विस्तारभय से उल्लिखित नहीं किये गये हैं।

इनके अतिरिक्त कुछ अन्य शब्द भी स्त्रीलिङ्ग के रूप में अभिहित (कथित) हैं। जैसे— तिन्दुकी, कणिका, भङ्गि, सुरङ्गा, सूचि, गाति, काकिनी (णी), चूणि, शाणी, द्रुणि, दरत। कन्या, आसन्दी (आसन), झल्लरी, चर्चरी, पारी, होरा, लट्वा, सिध्मला, लाक्षा, लिक्षा, गण्डूषा, गृध्रसी, चमसी और मसी आदि शब्द स्त्रीलिङ्ग में चर्चित हैं।

इति स्त्रीलिङ्गानुशासनम्

***

अथ पुँल्लिङ्गप्रकरणम्

३५/१. पुमान् ।

व्याख्या– अधिकारसूत्रमिदं वर्तते । इतोऽनन्तरं 'सारथ्यतिथिकुक्षिबस्तिपाण्यञ्जलयः' इति पर्यन्तं ये शब्दाः विवेचिताः भविष्यन्ति, तेषु 'पुमान्' इत्यस्याधिकारः प्रवर्तते ।

हिन्दी– 'पुमान्' यह अधिकारप्रवर्त्तक सूत्र है । यहाँ से 'सारथ्यतिथि' सूत्र-पर्यन्त इसका अधिकार है ।

३६/२. घञबन्तः । (द्वन्द्वगर्भो बहुव्रीहिसमासः) घञ् + अबन्तः ।

व्याख्या– घञन्तः अबन्तश्च धातुः पुंल्लिङ्गः स्यात् । यथा— घञ् = पाकः, त्यागः । अप्— करः, गरः, तरः, शरः । घञादयो भावार्थका एवेह गृह्यन्ते । यथा— अयं पाकः इत्यादि ।

हिन्दी– घञ् प्रत्ययान्त तथा अप् प्रत्ययान्त धातुजन्य शब्द पुंलिङ्ग होते हैं । जैसे— पाकः आदि ।

३७/३. घाचन्तश्च । घ + अच् + अन्तः च, घाचौ अन्ते यस्य सः घाजन्तः (द्वन्द्व-बहुव्रीहिः) । घान्तः अच् प्रत्ययान्तश्च धातुजन्यः शब्दः पुंसि (पुंल्लिङ्गे) स्यात् । यथा— विस्तरः (वि + स्तृ + अप्), गोचरः, चयः, जयः, नयः (नी + अच्) इत्यादि ।

हिन्दी– घान्त तथ अच् प्रत्यय से निष्पन्न धातुशब्द पुंलिङ्ग होते हैं । जैसे— विस्तर आदि ।

३८/४. भयलिङ्गभगपदानि नपुंसके ।

व्याख्या– इतरेतरद्वन्द्वसमासोऽत्र । भय— विभेत्यस्मात्– 'भी' अपादाने अच् । लिङ्ग— लिङ्ग + अच् । भग— भज् + घ । पद— पद् + अच् । पदं हि सर्वत्र गुणैर्निधीयते । अजाद्यन्तत्वेन पुंस्त्वे प्राप्ते अपवादार्थं सूत्रम् । एते शब्दाः नपुंसकलिङ्गाः स्युः । इदं भयम् ।

हिन्दी– भय, लिङ्ग, भग और पद— ये सभी शब्द नपुंसक लिङ्ग में होते हैं । यह पूर्व सूत्र का अपवाद है ।

३९/५. नङन्तः ।

व्याख्या– नङ् अन्ते यस्याऽसौ नङन्तः बहुव्रीहिसमासः । नङ्प्रत्ययान्तः शब्दः पुंसि स्यात् । यथा- यत्नः— यत् + भावे नङ्, 'यत्ने कृते यदि न सिद्धयति कोऽत्र दोषः' (हि० प्र०-३१) । प्रश्नः ।

हिन्दी– नङ् प्रत्ययान्त शब्द पुंल्लिङ्ग होते हैं । जैसे- यत्न, प्रश्न, यज्ञ आदि ।

४०/६. याच्ञा स्त्रियाम् ।

व्याख्या– याञ्चा स्त्रियाम् । नङ्प्रत्ययान्तत्वेन पुंस्त्वे प्राप्ते अपवादोऽयम् । याच्ञा— (याच् + नङ् + टाप्) शब्दः स्त्रीलिङ्गे भवति । 'याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा' (मेघदूत-६) ।

हिन्दी– 'याञ्चा' शब्द में नङ् प्रत्ययान्त होने के कारण पुंस्त्व प्राप्त था, किन्तु बाधित होकर स्त्रीलिङ्ग हुआ ।

४१/७. क्यन्तो घुः ।

व्याख्या– कि + अन्तो घुः । किप्रत्ययान्तो घुः (दाधा) पुंसि स्यात् । यथा— आधिः उदधिः (घटः), व्याधिः, निधिः । घुः किम् ? चक्रिः, जज्ञिः विशेष्यलिङ्ग एव ।

हिन्दी– किप्रत्ययान्त घुसंज्ञक शब्द पुंलिङ्ग होते हैं । जैसे— आधि, उदधि, व्याधि आदि ।

४२/८. इषुधिः स्त्री च । क्यन्तत्वेन पुंस्त्वे प्राप्ते स्त्रीत्वार्थं सूत्रम् ।

व्याख्या– इषुधि (इषु + धा + कि) शब्दः स्त्रीलिङ्गे पुंलिङ्गे च भवति । यथा— इयमयं वा इषुधिः ।

हिन्दी– इषुधि (तरकस) शब्द स्त्रीलिङ्ग और पुंलिङ्ग दोनों में होता है । जैसे— यह 'इषुधि' है ।

४३/९. देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्का-भिधानानि । (द्वन्द्वतत्पुरुषः) ।

व्याख्या– देवादिपर्यायशब्दाः यथासम्भवं तद्भेदवाचिनश्चासति बाधके पुंल्लिङ्गाः स्युः । यथा— देवाः सुराः । भेदाः ब्रह्मा, विष्णुः, शिवः, शक्रः । असुराः दनुजाः । आत्मा क्षेत्रज्ञः । स्वर्गः नाकः । गिरिः नगः । समुद्रः उदन्वान् सिन्धुः । नखः करजः । केशः कचः । दन्तः दशनः । स्तनः कुचः । भुजः प्रकोष्ठः । कण्ठः गलः । खड्गः असिः । शरः सायकः । पङ्कः कर्दमः । एते शब्दाः पुंलिङ्गाः भवन्ति ।

हिन्दी– सूत्रोक्त देव, असुर, आत्म, स्वर्ग, गिरि, समुद्र, नख, केश, दन्त, स्तन, भुज, कण्ठ, खड्ग, शर और उनके पर्यायवाची शब्द पुंलिङ्ग होते हैं; यदि बाधक सूत्र न हो तो ।

४४/१०. त्रिविष्टपत्रिभुवने नपुंसके । (इतरेतरद्वन्द्वसमासोऽत्र) ।

व्याख्या– तृतीयभुवनवाचक'त्रिविष्टप' ('त्रिपिष्टप'शब्दो वा) क्लीबे स्यात् । यथा— इदं त्रिविष्टपं– स्वर्गः ।

हिन्दी– त्रिविष्टप (अथवा त्रिपिष्टप) तथा त्रिभुवन दोनों शब्द नपुंसकलिङ्ग में होते हैं ।

४५/११. द्यौः स्त्रियाम् । स्वर्गाभिधायित्वेन पुंस्त्वे प्राप्तेऽयमारम्भः ।

व्याख्या– द्योदिवोस्तन्त्रेण ग्रहणम् । द्योशब्दः दिन् शब्दश्च स्त्रियां स्यात् । इयं द्यौः, इमे भूदिवौ ।

हिन्दी– द्यो और दिव् शब्द एकतन्त्र से ग्रहण होता है । अतः द्यो और दिव् शब्द स्त्रीलिङ्गवाची हैं ।

४६/१२. इषुबाहू स्त्रियां च । अत्रेतरेतरद्वन्द्वसमासः ।

व्याख्या– इषु-बाहुशब्दौ पुंसि स्त्रियां च स्याताम् । शरवाचित्वेन भुजवाचित्वेन पुंस्त्वे प्राप्ते पक्षे स्त्रीत्वविधानार्थमारम्भः । यथा— इयमयं वा इषुः बाहुः ।

हिन्दी– इषु और बाहु शब्द पुंल्लिङ्ग और स्त्रीलिंग दोनों में होते हैं ।

४७/१३. बाणकाण्डौ नपुंसके च ।

व्याख्या– बाणश्च काण्डश्च बाणकाण्डौ (इतरेतरद्वन्द्वसमासः) । एतौ बाणकाण्डौ पुंसि नपुंसके च स्याताम् । शरवाचित्वेन पुंस्त्वे प्राप्ते पक्षे क्लीबत्वार्थमारम्भः । यथा— अयमिदं वा बाणः बाणं, काण्डः काण्डम् ।

हिन्दी– बाण और काण्ड— ये दोनों शब्द पुंलिङ्ग और नपुंसक लिङ्ग में होते है अर्थात् द्विलिङ्गी हैं ।

४८/१४. नान्तः । न् अन्ते यस्य = बहुव्रीहिसमासः ।

व्याख्या– न् इत्येतदन्तः पुंसि स्यात् । यथा— श्वा, तक्षा, वृषा, उक्षा । चर्मवर्मादयस्तु 'मन् द्व्यच्कोऽकर्त्तरि' इति परसूत्रेणास्य बाधात् क्लीबलिङ्गाः । तत्र 'द्व्यच्कः' इत्युक्तेः पृथिमा, मृदिमा इत्यादयः नन्तत्वेन पुंस्येव ।

हिन्दी– न् अन्त में रहने वाले शब्द पुंलिङ्ग होते हैं। जैसे— श्वा, तक्षा, वृषा, उक्षा आदि।

४९/१५. क्रतुपुरुषकपोलगुल्फमेघाभिधानानि। अस्मिन् सूत्रे हि द्वन्द्वसहितः तत्पुरुषसमासः।

व्याख्या– क्रत्वादि (क्रतु-पुरुष-कपोल-गुल्फ-मेघ) पर्यायशब्दाः यथासम्भवं पुंसि स्युः। यथा— क्रतुः अध्वरः। भेदः— उक्थः, अग्निष्टोमः। पुरुषः नरः। कपोलः गण्डः। गुल्फः प्रपदः। मेघः नीरदः जलधरः, भेदः— पुष्करः, आवर्त्तकः।

हिन्दी– क्रतु, पुरुष, कपोल, गुल्फ और मेघ शब्द तथा उनके पर्यायवाची शब्द पुंल्लिङ्ग में होते हैं।

५०/१६. अभ्रं नपुंसकम्।

व्याख्या– मेघवाचित्वेन पुंस्त्वप्राप्ते तदपवादः। अभ्र (अभ्र् + अच् अथवा अप्— भृ अपो बिभर्त्ति भृ + क) शब्दः नपुंसकलिङ्गे भवति। यथा— अभ्रम्।

हिन्दी– अभ्र' शब्द नपुंसकलिङ्गी होता है। जैसे— अभ्रम्।

५१/१७. उकारान्तः। उकार + अन्तः, बहुव्रीहिसमासः।

व्याख्या– उकारान्तः शब्दः पुंसि स्यात् , यथा— विभुः, विधुः, इक्षुः। इदञ्च विशेषैरबाधितविषयम्। अत एव 'हनुर्हट्टविलासिन्यां नृत्यारम्भे गदे स्त्रियाम् , द्वयोः कपोलावयवे' इति मेदिनिः।

हिन्दी– उकारान्त शब्द पुंल्लिङ्ग में व्यवहृत हैं। जैसे— विभु, विधु, इक्षु आदि।

५२/१८. धेनुरज्जुकुहूसरयूतनुरेणुप्रियङ्गवः स्त्रियाम्। इतरेतरद्वन्द्वसमासोऽत्र।

व्याख्या– उदन्तत्वेन पुंस्त्वे प्राप्ते तदपवादार्थं सूत्रम्। सूत्रस्थाः शब्दाः स्त्रियां स्युरिति। यथा— इयं धेनुः, रज्जुः कुहुः, सरयु, तनु, रेणु, प्रियङ्गुः। अत्र अप्राणिजातित्वात्पक्षे ऊङ्। कूहूः सरयूः तनूः रेणूः प्रियङ्गूः। धेनोः प्राणित्वात् रज्जोश्च पर्युदासान्नोङ्।

हिन्दी– सूत्रस्थ धेनु, रज्जु, कुहु, सरयू, तनु, रेणु एवं प्रियङ्गु शब्द स्त्रीलिंङ्ग हैं।

५३/१९. समासे रज्जुः पुंसि च।

व्याख्या– समासान्तस्थः रज्जुशब्दः पुंसि (पुंलिङ्गे) भवति, सूत्रस्थचकारात् स्त्रियाम् = स्त्रीलिङ्गेऽपि भवति। रज्जु = (सृज् + उ, असुमागमः धातोस्सलोपः आगमसकारस्य जश्त्वं दकारः, तस्यापि चुत्वं चकारः) कर्कशरज्ज्वा, कर्कशरज्जुना वा बध्नाति।

हिन्दी– समास में रज्जु शब्द पुंलिङ्ग तथा स्त्रीलिङ्ग दोनों होता है। जैसे— कर्कशरज्जुना रज्ज्वा वा।

५४/२०. श्मश्रुजानुस्वाद्वश्रुजतुत्रपुतालूनि नपुंसके। इत्यत्रेतरेतरद्वन्द्वसमासः।

व्याख्या– उदन्तत्वेन पुंस्त्वे प्राप्ते तदपवादाय सूत्रमिदं प्रवर्त्तितम्। श्मश्रु-जानु-स्वादु-अश्रु-जातु-त्रपु-तालु— एते शब्दाः क्लीबे = नपुंसके स्युरिति। श्मश्रु— श्म पुं मुखं श्रूयते लक्ष्यतेऽनेन— श्रु + डु 'ज्योतिष्कणाहतश्मश्रु' (रघु०-१५।५२)। जानु— जन + ञुण् 'जानुभ्यामवनिं गत्वा'। स्वादु— स्वद् + उण् 'तृषा शुष्यत्यास्ये पिबति सलिलं स्वादु सुरभि' (भर्तृ०-३।९२)। अश्रु— अश्नुते व्याप्नोति नेत्रम-दर्शनाय— अश् + क्रुन्।

हिन्दी– उकारान्त श्मश्रु, जानु, स्वादु, अश्रु, त्रपु, और तालु— ये शब्द नपुंसकलिङ्गी हैं।

५५/२१. वसु चार्थवाचि।

व्याख्या– अर्थवाचि वसुशब्दः क्लीबे = नपुंसके स्यात्। वसु— वस् + उन् 'स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी' (कि०-१।१८)। अर्थवाचीत्युक्तेः 'वसुर्मयूखाग्निधनाधिपेषु देवभेदे च पुमान्'।

हिन्दी– धनवाची उकारान्त 'वसु' शब्द नपुंसकलिङ्गी होता है।

५६/२२. मद्गुमधुशीधुसानुकमण्डलूनि नपुंसके च। अत्र इतरेतरद्वन्द्वसमासः।

व्याख्या– मद्गु-मधु-शीधु-सानु-कमण्डलु— एते शब्दाः पुंसि नपुंसके च भवन्ति। पुंस्त्वे प्राप्ते पक्षे क्लीबत्वार्थं सूत्रमिदं प्रवर्त्तितम्। यथा— अयं मद्गुः इदं वा मद्गुः (मस्ज् + उन्यङ् क्वा०), मधु (मन्यत इति मधु, मन् + उ, नस्य धः), शीधु (शी + धुक्), सानु (सन् + ञुण्), कमण्डलु (कस्य जलस्य मण्डं लाति, क + मण्ड + ला + कु)।

हिन्दी– उकारान्त मद्गु, मधु, शीधु, सानु और कमण्डलु शब्द पुंलिङ्ग और नपुंसक लिङ्ग— दोनों में होते हैं।

५७/२३. रुत्वन्तः। अस्मिन् सूत्रे द्वन्द्वसहितो बहुव्रीहिसमासः।

व्याख्या– रुकारान्तः तुकारान्तश्च शब्दः पुंल्लिङ्गे स्यात्। उकारान्तत्वेनैवं प्राप्ते प्रपञ्चार्थः। यथा— मेरुः (मि + रु) 'विभज्य मेरुर्न यदर्थिसात्कृतः' (नै०-१।१६)।

सेतुः (सि + तुन्) 'वैदेहि पश्यामलयाद्विभक्तं मत्सेतुना फेनिलमम्बुराशिम्' (रघु०-१३।२) ।

हिन्दी– रुकारान्त और तुकारान्त शब्द पुंल्लिङ्ग होते हैं। जैसे— मेरु, सेतु, हेतु आदि ।

५८/२४. दारुकसेरुजतुवस्तुमस्तूनि नपुंसके । अत्र सूत्रे इतरेतरद्वन्द्वसमासः । क्वचित् 'जत्रु' इति पाठः ।

व्याख्या– पूर्वसूत्रापवादः । दारु, कसेरु, जतु (जत्रु), वस्तु, मस्तुशब्दाः क्लीबे (नपुंसके) स्युः । यथा— दारु (दृ + उण्), कसेरु-कशेरु (के देहे शीर्यते कं जलं वा शृणाति, क + शृ+ उ, एरङादेश; कस् + रुरुन् वा), जतु-जत्रु (जांयते वृक्षादिभ्यः, जन् + उ त आदेशः), वस्तु (वस् + तुन्) 'वस्तुनि अवस्त्वारोपोऽज्ञानम्, मस्तु (मस् + तुन्) एते शब्दाः नपुंसकलिङ्गे भवन्ति ।

हिन्दी– दारु, कसेरु, जतु (जत्रु), वस्तु और मस्तु शब्द नपुंसक लिङ्ग में होते हैं।

५९/२५. सक्तुर्नपुंसके च । सक्तुः + नपुंसके च ।

व्याख्या– त्वन्तत्वेन पुंस्त्वे प्राप्ते पक्षे क्लीबत्वार्थं सूत्रम्, चात् नपुंसके । यथा— सक्तुः (सञ्ज् + तुन् + किच्च) 'भिक्षा सक्तुभिरेव सम्प्रति वयं वृत्तिं समीहामहे' (भर्तृ०-३।६४) । अयं सक्तुः, इदं सक्तु ।

हिन्दी– 'सक्तु' शब्द पुंल्लिङ्ग तथा नपुंसकलिङ्ग दोनों में होते हैं ।

६०/२६. प्राग्रश्मेरकारान्तः । प्राक रश्मेः अकारान्तः, बहुव्रीहिसमासोऽत्र ।

व्याख्या– इत ऊर्ध्वं रश्मिशब्दघटितसूत्रपर्यन्तमकारान्तोऽधिक्रियते । अधिकारसूत्रमिदम् ।

हिन्दी– यह अधिकारप्रवर्तक सूत्र है । यहाँ से अग्रिम— आने वाला 'रश्मि-दिवसाभिधानानि' सूत्र के पूर्व तक इसका अधिकार है ।

६१/२७. कोपधः । अत्र बहुव्रीहिसमासः— क उपधायां यस्य स कोपधः ।

व्याख्या– ककार उपधाभूतो यस्य तथाभूतोऽकारान्तः पुंसि स्यात् । अत्र विशेषः— कारकपाठकादयस्तु विशेषणशब्दत्वेन त्रिलिङ्गाः । अत्र च प्रकरणे प्रायः विशेष्यशब्दाना-मेव लिङ्गमनुशिष्यते, न तु विशेषणशब्दानामिति न व्यभिचारः । यथा— अयं स्तबकः, करकः कोरकः ।

हिन्दी– ककार उपधा वाले शब्द पुंल्लिङ्ग में होते हैं । जैसे— स्तबक, करक, कोरक आदि ।

६२/२८. चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि नपुंसके । इतरेतरद्वन्द्व-समासोऽत्र ।

व्याख्या– कोपधतया पुंस्त्वे प्राप्तेऽपवादः । चिबुक— चिन् (ब्) + उ + कन् = पृषोदरादित्वात् ह्रस्वः । 'चिबुकं सुदृशः स्पृशामि यावत्' (भामि०-२।३४) । शालूका— शल् + ऊकण् । प्रातिपदिक— प्रतिपदा + ठञ्, 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' (पा० सू०-१।२।४५) । अंशुक— अंशु + क, अंशवः सूत्राणि विषया यस्य 'यत्रांशुकाक्षेपविलज्जितानाम्' (कु०-१।१४) । उल्मुक— उष् + मुक्, षस्य लः । एते शब्दाः क्लीबे स्युरिति ।

हिन्दी– 'क' उपधा वाले चिबुक, शालूक, प्रातिपादिक, अंशुक और उल्मुक— ये शब्द नपुंसकलिङ्गी हैं ।

६३/२९. कण्टकानीकसरकमोदकचषकमस्तकपुस्तकतडाकनिष्कशुष्क-वर्चस्कपिनाकभाण्डकपिण्डककटकशण्डकपिटकतालकफलककल्कपुलाकानि नपुंसके च । इतरेतरद्वन्द्वसमासः ।

व्याख्या– सूत्रस्थाः शब्दाः पुंस्त्वे क्लीबे च सन्ति । तद्यथा— कण्टक— कण्ट + ण्वुल् 'पादलग्नं करस्थेन कण्टकेनैव कण्टकम् उद्धरेत्' (चाण०-२२) । अनीक— अन् + ईकन् 'दृष्ट्वा तु पाण्डवानीकम्' (भग०-१।२) । सरक— सृ + वुन् 'चक्रुरथ सह पुरन्ध्रिजनैरयथार्थसिद्धिसरकं महीभृतः' (शिशुपाल-१५।८०) । मोदक— मोद-यति मुद् + णिच् + ण्वुल् । चषक— चष् + क्वुन्, 'च्युतैः शिरस्त्रैश्चषकोत्तरेव' (रघु०-७।४९) । मस्तक— मस्मति परिमात्यनेन मस् करणेत स्वार्थे क तारा० 'अतिलोभाभिभूतस्य चक्रं भ्रमति मस्तके' (पंच०-५।२२) । कण्टकः-कण्टकम् । इत्यादिशब्दाः उभयलिङ्गाः भवन्ति ।

हिन्दी– कण्टक, अनीक, सरक, मोदक, चसक, मस्तक, पुस्तक, तटाक, निष्क, शुष्क, वर्चस्क, पिनाक, भाण्टक, पिण्डक, कटक, दण्डक, पिटक, तालक, फलक, कल्क और पुलाक— ये शब्द पुंल्लिङ्ग और नपुंसकलिङ्ग दोनों में होते हैं ।

६४/३०. टोपधः । बहुव्रीहिसमासोऽत्र ।

व्याख्या– टोपधः अकारान्तः पुंसि (पुंल्लिङ्गे) स्यात् । यथा— घटः पटः (घट् + अच्, पट् + अच्) । 'कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम्' (भर्तृ०-२।४९) ।

हिन्दी– 'ट' उपधा वाला शब्द पुंल्लिङ्ग होता है । जैसे— घट, पट आदि ।

६५/३१. किरीटमुकुटललाटवटवीटशृङ्गाटकरटलोष्टानि नपुंसके । सूत्रेऽस्मिन्नितरेतरद्वन्द्वसमासः ।

व्याख्या– किरीटादयो मुख्यशब्दाः नपुंसकलिङ्गे भवन्ति । पूर्वसूत्रापवादः । तत्रादौ **किरीटम्**— कृ + कीटन्, 'किरीटबद्धाञ्जलयः' (कु०-७।९२) । मुकुट— मंक + अटन् (पृषोदरादित्वात्) 'मुकुटरत्नमरीचिरस्पृशत्' (रघु०-९।१३) । ललाट— लड् + अच्, डस्य लः, ललमटति अट् अण् वा, 'लिखितमपि ललाटे प्रोज्झितुं कः समर्थः' (हि०-१।२१) । वट-वीट, शृङ्गाटक— शृङ्गं प्रधान्यमटति, शृङ्ग + अट् + अण् । करट, लोष्ट— लुष् + तन् 'परद्रव्येषु लोष्टवत्' ।

हिन्दी– यह पूर्व सूत्र का अपवादक सूत्र है । सूत्रोक्त किरीट, मुकुट, ललाट, वट, वीट, शृङ्गाट, करट और लोष्ट— ये शब्द नपुंसकलिङ्ग में होते हैं । जैसे— किरीटम्, मुकुटम्, ललाटम् इत्यादि ।

६६/३२. कुटकूटकपटकवाटकर्पटनटनिकटकीटकटानि नपुंसके च । अत्र सूत्रे इतरेतरद्वन्द्वसमासः ।

व्याख्या– एते कुटादयः शब्दाः नपुंसके पुंसि च स्युः । तद्यथा— कुटं-कुटः— कुट् + कम् । कपट— के मूर्ध्नि पट इव आच्छादकः, 'कपटशतमयं क्षेत्रमप्रत्ययानाम्' (पंच०-१।१९१) । कवाट— कलं शब्दमटति, कु + अप् , अट् + अच् । कर्पट— कृ + विच् = कर, स च पटश्च (कर्मधारयसमास) । नट, निकट— नि समीपे कटति नि + कट् + अच् । कीट-कटप्रभृतयः ।

हिन्दी– उपर्युक्त कुट, कूट, कपट, कपाट, कर्पट, नट, निकट, कीट और कट शब्द नपुंसक तथा पुंल्लिङ्ग दोनों में होते हैं ।

६७/३३. णोपधः । ण उपधायां विद्यते यस्य सः णोपधः (बहुव्रीहिसमासोऽत्र) ।

व्याख्या– णोपधोऽकारान्तः पुंसि (पुंल्लिङ्गे) स्यात् । यथा– गुणः— गुण् + अच्, 'साधुत्वे तस्य को गुणः' (पंच०-४।१०८) । शणः— शण् + अच् । पाषाणः— पिनष्टि– पिष् सञ्चूर्णने आनच् (पृषो० तारा०) आदयः शब्दाः पुंल्लिङ्गे भवन्ति ।

हिन्दी– 'ण' उपधा वाले अकारान्त शब्द पुंलिङ्ग होते हैं। जैसे— गुण, शण, पाषाण आदि।

६८/३४. ऋणलवणपर्णतोरणरणोष्णानि नपुंसके। अस्मिन् सूत्रे इतरेतरद्वन्द्व-समासः।

व्याख्या– पूर्वसूत्रस्यापवादः। ऋणादयो नपुंसके भवन्ति शब्दाः। तत्रादौ ऋणम्— ऋ + क्त, अन्त्यमृणम्। लवणम्— लू + ल्युट् (पृषो० णत्वम्) 'आभाति वेलालवणाम्बुराशेः' (रघु०-१३।१५)। पर्णम्— पर्ण् + अच्; एवमेव तोरण, रण्, उष्णशब्दा अपि नपुंसके भवन्ति। अमरस्तु 'तोरणोऽस्त्री' इत्युक्तवान्, तन्मूलं मृग्यम्। उष्णशब्स्य स्पर्शवाचित्वे एव क्लीबता। तद्वति तु गुणवचनत्वेन त्रिलिङ्गत्वम्।

हिन्दी– 'ण' उपधा वाले ऋण, लवण, पर्ण, तोरण, रण और उष्ण शब्द नपुंसकलिङ्ग में होते हैं।

६९/३५. कार्षापणस्वर्णसुवर्णव्रणचरणवृषणविषाणचूर्णतृणानि नपुंसके च। सूत्रेऽत्रेतरेतरद्वन्द्वसमासः।

व्याख्या– उपर्युक्ताः कार्षापणादयः शब्दाः पुंसि नपुंसकलिङ्गे च स्युरिति, चकारात् नपुंसके। तद्यथा– कार्षापण— कर्ष + अण् = कार्षः, आ + पण् + घञ् आपणः, कार्षस्य आपणः (बहुव्रीहिसमासः); स्वर्ण— सुष्ठु अर्णो वर्णो यस्य; सुवर्ण— सुष्ठु वर्णो यस्य; 'नन्वहं दशसुवर्णान् प्रयच्छामि' (मृच्छकटिक-२)। व्रण— व्रण् + अच्; चरण— चर + ल्युट्, 'शिरसि चरण एष न्यस्यते वारयैनम्; वृषण— वृष् + क्यु; विषाण— विष् + कानच्, 'साहित्यसंगीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः' (भर्तृ०-२।१२); चूर्ण— चूर्ण + अच्; तृण— तृह् + क्न, हलोपश्च।

हिन्दी– उपर्युक्त कार्षापण, स्वर्ण, सुवर्ण, व्रण, चरण, वृषण, विषाण, चूर्ण और तृण शब्द पुंल्लिङ्ग और नपुंसकलिङ्ग दोनों में होते हैं।

७०/३६. थोपधः। 'थ' उपधायां यस्य शब्दस्य सः थोपधः (बहुव्रीहिसमासः)।

व्याख्या– थकारोपधः अकारान्तः पुंसि स्यात्। यथा– रथः— 'रम्यते अनेन अत्र वा' रम् + कथन्; अर्थः— ऋ + थन्, 'ज्ञातार्थो ज्ञानसम्बन्धः श्रोतुं श्रोता प्रवर्तते'।

हिन्दी– थकार उपधावाले अकारान्त शब्द पुंल्लिङ्ग होते हैं।

७१/३७. काष्ठपृष्ठसिक्थोक्थानि नपुंसके। अत्रेतरेतरद्वन्द्वसमासः।

व्याख्या– पूर्वसूत्रापवादः । काष्ठ-पृष्ठ-सिक्थ-उक्थ इत्येते शब्दाः नपुंसके स्युः । तत्रादौ काष्ठम्— काश् + क्थन्; पृष्ठ— पृष् स्पृश् वा थक् नि० साधुः । सिक्थ— सिच् + थुक्, 'ग्रासोद्गलितसिक्थेन का हानिः करिणो भवेदि'त्यत्र पुंस्त्वमपि सूच्यते, सिक्थमपि भवति । उक्थम्— वच् + थक् । एते शब्दाः नपुंसकलिङ्गे भवन्ति ।

हिन्दी– 'थ' उपधा से संयुक्त अकारान्त काष्ठ, पृष्ठ, सिक्थ और उक्थ शब्द नपुंसक लिङ्ग में होते हैं । 'सिक्थ' शब्द पुंलिङ्ग में भी प्राप्त होता है ।

७२/३८. काष्ठा दिगर्था स्त्रियाम् । दिक् अर्थः यस्या सा दिगर्था (बहुव्रीहि-समासः) ।

व्याख्या– दिग्वाचककाष्ठाशब्दः स्त्रियां (स्त्रीलिङ्गे) स्यात् । काष्ठा— काश् + क्थन् + टाप्, 'स्वयं विशीर्णद्रुमपर्णवृत्तिता परा हि काष्ठा तपसः' (कु०-५।२८), 'दिशस्तु ककुभः काष्ठा' इत्यमरः । अत्र दिशि इत्यनेनेष्टसिद्धौ सीमार्थेऽपि स्त्रीत्वार्थमर्थग्रहणम् प्रयोगः ।

हिन्दी– दिशावाचक 'थ' उपधायुक्त 'काष्ठा' शब्द स्त्रीलिङ्ग होता है ।

७३/३९. तीर्थप्रोथयूथगूथानि नपुंसके च । अस्मिन् सूत्रे इतरेतरद्वन्द्वसमासः ।

व्याख्या– चादधिकारात् पुंसीत्येवानुषज्यते, न तु स्त्रियामिति । तेन 'प्रोथमस्त्रियाम्' इत्यमरोक्तिः । तथा च पूर्वं तीर्थमिति— तृ + थक्, 'कृततीर्थः पयसामिवाशयः' (कि०-२।३); प्रोथ— प्रोथ् + घ; यूथ— यु + थक् (पृषो० दीर्घः); गूथ— गू + थक्; तीर्थम्-तीर्थः आदि ।

हिन्दी– 'थ' उपधावाले अकारान्त तीर्थ, प्रोथ, यूथ और गूथ शब्द पुंल्लिङ्ग तथा नपुंसकलिङ्ग में होते हैं ।

७४/४०. नोपधः । न उपधायां यस्य स नोपधः (बहुव्रीहिसमासोऽत्र) ।

व्याख्या– अदन्तो नोपधः पुंसि (पुंल्लिङ्गे) स्यात् । यथा– इनः— इण् + नक्, फेनः— स्फाय् + न, फेशब्दादेशपक्षे णत्वम्, फेणः-फेनः; 'गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः' (मेघ०-५०) ।

हिन्दी– अदन्त 'न' उपधा वाले शब्द पुंल्लिङ्गवाची होते हैं । जैसे— इन, फेन आदि ।

७५/४१. जघनाजिनतुहिनकाननवनवृजिनविपिनवेतनशासनसोपानमिथुनश्मशानरत्ननिम्नचिह्नानि नपुंसके । इतेरतरद्वन्द्वसमासोऽत्र— जघन....चिह्नानि ।

व्याख्या– पूर्वसूत्रस्यापवादभूतमिदं सूत्रम् । एषु शासनशब्द: परित्यक्तुं शक्यते, ल्युडन्तत्वेन क्लीबत्वस्य वक्ष्यमाणत्वात् । अवशिष्टा: जघनादय: शब्दा: क्लीबे स्युरिति । तथाच जघन— हन् + अच्, द्वित्वम् 'घटयजघने काञ्चीमञ्चस्रजा कबरीभरम्' (गीत०-१२); अजिनम्— अज् + इनच् 'अथाजिनाषाढधर:' (कुमार०-५।३०); तुहिनम्— तुह् + इनम्, ह्रस्वश्च ।

हिन्दी– 'न' उपधा वाले अकारान्त जघन, अजिन, तुहिन, कानन, वन, वृजिन, विपिन, वेतन, शासन, सोपान, मिथुन, श्मशान, रत्न, निम्न और चिह्न— ये शब्द नपुंसक लिङ्ग में होते हैं ।

७६/४२. मानयानाभिधाननलिनपुलिनोद्यानशयनासनस्थानचन्दनालानसमानभवनवसनसम्भावनविभावनविमानानि नपुंसके च । अस्मिन् सूत्रे इतरेतरद्वन्द्वसमास: ।

व्याख्या– एते मान....विमानादय: शब्दा: पुंसि क्लीबे च स्यु: । मानादिषु केषाञ्चिन्नान्तत्वेन पुंस्त्वे केषाञ्चिच्च ल्युडन्ततया तद्बाधकसूत्रेण क्लीबत्वे प्राप्ते चोभयलिङ्गतार्थं सूत्रमिदं प्रवर्त्तितम् । यथा— मान: मानम्– मन् + घञ् 'मानद्रविणाल्पता' (पञ्च०-२।१५९), मानम्— 'रसधर्मत्वे किं मानम्' (रस०); यान— या + भावे ल्युट् 'समुद्रयानकुशला:' (मनु०-८।१५७); अभिधान— अभि + धा + ल्युट् 'एतावतामर्थानामिदमभिधानम्' (निरुक्त); नलिन— नल् + इनच्; पुलिन— पुल् + इनन् + किच्च; 'रमते यमुनापुलिनवने विजयी मुरारिरधुना' (गीत०-७); उद्यान— उद् + या + ल्युट् 'शयनस्थो न भुञ्जीत' (मनु०-४।७४); आसन— आस् + ल्युट् 'स वासवेनासनसन्निकृष्टम्' (कुमार०-१।२); स्थान— स्था + ल्युट्; चन्दन— चन्द + णिच् + ल्युट् । एवमेवालानादयोऽपि शब्दा: । वस्तुत: 'करणाधिकरणयोर्ल्युट्' इति वक्ष्यमाणसूत्रेण त्रिलिङ्गत्वप्राप्तौ पूर्वापवादेन नपुंसकत्वमेवेति तदपवादार्थं सूत्रमिदम् ।

हिन्दी– 'न' उपधा वाले अकारान्त 'मान' से लेकर 'विमान'पर्यन्त सभी शब्द पुंल्लिङ्ग तथा नपुंसकलिङ्ग में होते हैं ।

७७/४३. पोपध: । 'प' उपधायां यस्यैवम्भूतोऽकारान्त: शब्द: पुंल्लिङ्गे भवति ।

व्याख्या– अदन्त: पोपध: पुंसि स्यात् । यथा– धूप:— धूप् + अच् 'धूपोष्मणा त्याजितमार्द्रभावम्' (कुमार०-७।१४), दीप:— दीप् + णिच् + अच् 'नृपदीपो धनस्नेहं प्रजाभ्य: संहरन्नपि' (पञ्च०-१।२२१), यूप:— यू + पक् (पृषोदरादित्वाद्दीर्घ:), 'अपेक्ष्यते साधुजनेन वैदिकी श्मशानशूलस्य न यूपसत्क्रिया' (कुमार०-५।७३) ।

हिन्दी– 'प' उपधा वाले अकारान्त धूप, दीप और यूप शब्द पुल्लिङ्ग होते हैं।

७८/४४. पापरूपोडुपतल्पशिल्पपुष्पशष्पसमीपान्तरीपाणि नपुंसके । इतरेतरद्वन्द्व-समासोऽत्र ।

व्याख्या– पूर्वसूत्रापवादः । पाप-रूप-उडुप-ताप-(तल्प)-शिल्प-पुष्प-शष्प-समीप-अन्तरीप— एते शब्दाः क्लीबे (नपुंसके) स्युरिति । तद्यथा– पापम्— पाति रक्षति आत्मानमस्मात्) पा + प 'पापं पापाः कथयथ कथं शौर्यराशेः पितुर्मे' (वेणी०-३।५), रूपम्— रूप + क + भावे अच् वा 'विरूपं रूपवन्तं वा पुमानित्येव भुञ्जते' (पञ्च०-१।१४३), उडुपम्— उड् + कु वा 'तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्' (रघु०-१।२), तल्पम्— तल् + पक् 'सपदि विगतनिद्रस्तल्पमुज्झाञ्चकार' (रघु०-५।७५), तापः— तप् + घ० 'इतरतापशतानि तवेच्छया वितरितानि सहे चतुरानन' (उद्भट), शिल्पम्— शिल् + पक्, पुष्पम्— पुष् + अच्, शष्पम्— शष् + पक्, समीपम्— संगता आपो यत्र– अच् , आत ईत्वम् । अन्तरीप— अन्तर्मध्ये गता आपो यस्य– बहुव्रीहि-समासः, आत ईत्वम्, पुंस्त्वेऽपि शब्दकोशे ।

हिन्दी– 'प' उपधा वाले अकारान्त पाप, रूप, उडुप, तल्प (ताप), शिल्प, पुष्प, शष्प, समीप और अन्तरीप शब्द नपुंसक लिङ्ग में होते हैं ।

७९/४५. शूर्पकुतपकुणपद्वीपविटपानि नपुंसके च । अत्रेतरेतरद्वन्द्वसमासः ।

व्याख्या– शूर्प-कुतप-कुणप-द्वीप-विटप— एते शब्दाः पुंसि क्लीबे च स्युरिति । तद्यथा शूर्पः— शृ + पः ऊश्च नित्, कुतप— कु + तप् + अच्—

अह्नो मुहूर्त्ता विख्याता दश पञ्च च सर्वदा ।
तत्राष्टमो मुहूर्त्तो यः सः कालः कुतपः स्मृतः ॥ (ज्योतिष)

हिन्दी– 'प' उपधा से युक्त अकारान्त शूर्प, कुतप, कुणप, द्वीप, विटप— ये शब्द पुंलिङ्ग तथा नपुंसकलिङ्ग में होते हैं ।

८०/४६. भोपधः । 'भ' उपधायां यस्य सः भोपधः (बहुव्रीहिसमासः) ।

व्याख्या– अदन्तः (अकारान्तः) भोपदः शब्दः पुंसि (पुंल्लिङ्गे) स्यात् । यथा करभः— कृ + अभच् 'करभोपमोरुः' (रघु०-६।८३), कुम्भः— कुं भूमिं कुत्सितं वा उम्भति पूरयति— उम्भ् + अच् शक० तारा० 'वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम्' (हि०-१।७७) ।

हिन्दी– 'भ' उपधा वाले अकारान्त शब्द पुंल्लिङ्ग में होते हैं। जैसे— करभः, कुम्भः, शलभः।

८१/४७. तलभं नपुंसकम्।

व्याख्या– पूर्वसूत्रापवादः। भकारः उपधा यस्य, एवम्भूतोऽकारान्तस्तलभशब्दो नपुंसकलिङ्गे भवति। यथा— तलभम्।

हिन्दी– भकार उपधा वाला अकारान्त शब्द "तलभम्' नपुंसक लिङ्ग में होता है।

८२/४८. जृम्भं नपुंसके च।

व्याख्या– भकारोपधः अकारान्तः जृम्भशब्दः पुंल्लिङ्गे नपुंसके च लिङ्गे स्यात्। तद्यथा— अयं जृम्भः— जृम्भ् + घञ् ल्युट् वा, जृम्भ् + अ + टाप्— जृम्भा + कन्, इत्वम्। 'जृम्भारम्भप्रविततदलोपान्तजालप्रविष्टैः' (वेणी०-२।७)।

हिन्दी– भकार उपधा वाला अकारान्त 'जृम्भ' शब्द पुंल्लिङ्ग और नपुंसकलिङ्ग दोनों होता है। जैसे— जृम्भः, जृम्भम्। अङि तु स्त्रीत्वात् जृम्भा।

८३/४९. मोपधः। 'म' उपधायां यस्य स मोपधः (बहुव्रीहिसमासोऽत्र)।

व्याख्या– अदन्तः मोपधः पुंसि (पुंल्लिङ्गे) स्यात्। तद्यथा सोमः— सू + मन्, स्तोमः— स्तु + मन् 'भस्मस्तोमपवित्रलाञ्छनमुरो धत्ते त्वचं रौरवीम्' (उत्तर०-४।२०), भीमः— विभेत्यस्माद्, भी अपादाने मक्, मध्यम पाण्डवः।

हिन्दी– 'म' उपधा वाले अकारान्त शब्द पुंल्लिङ्ग में होते हैं। जैसे— सोम, स्तोम, भीम आदि।

८४/५०. रुक्मसिध्मयुध्मेध्मगुल्माध्यात्मकुङ्कुमानि नपुंसके। इतरेतरद्वन्द्वसमासोऽत्र।

व्याख्या– रुक्म, सिध्म, युध्म (क्वचित् 'युग्म' इति पाठः), इध्म, गुल्म, अध्यात्म, कुङ्कुम इत्येते अकारान्ताः शब्दाः नपुंसकलिङ्गे भवन्ति। पूर्वसूत्रापवादः। यथा— रुक्मम्, सिध्मम्, आत्मनीति विभक्त्यर्थेऽव्ययीभावे अनन्तत्वेनाच् समासान्ते टिलोपे अदन्तत्वम् तस्य चाव्ययत्वेऽपि नपुंसकत्वकथमदन्तमोपधत्वेन प्राप्तपुंस्त्वापवादार्थम्। वस्तुतः अध्यात्मशब्दः प्रत्याख्यातुं शक्यः।

हिन्दी– 'म' उपधा वाला अकारान्त रुक्म, सिध्म, युध्म (युग्म), इध्म, गुल्म, अध्यात्म, कुङ्कुम— ये शब्द नपुंसक लिङ्ग में होते हैं।

८५/५१. संग्रामदाडिमकुसुमाश्रमक्षेमक्षौमहोमोद्दामानि नपुंसके च।

व्याख्या– संग्राम....उद्दामान्यत्रेतरेतरद्वन्द्वसमासः । मोपधाः अकारान्ताः संग्राम-दाड़िम-कुसुम-आश्रम-क्षेम-क्षौम-होम-उद्दाम— एते शब्दाः पुंसि चात् नपुंसके च स्युः । यथा— संग्रामः-संग्रामम्— संग्राम + अच् 'सङ्ग्रामाङ्गणमागतेन भवता चापे समारोपिते' (काव्य०-१०); दाडिमः-दाडिमम्— दल् + घञ् + इमम्, डलयोरभेदः 'पाकारुण-स्फुटदाडिमकान्तिवक्त्रम्' (मा०-९।३१) । अत्रोद्दामशब्दः प्रचण्डवाची । उद्यतो दामाया इति विग्रहे तु विशेष्यलिङ्ग एव ।

हिन्दी– 'म' उपधा वाले अकारान्त संग्राम, दाडिम, कुसुम, आश्रम, क्षेम, क्षौम, होम और उद्दाम शब्द पुंल्लिङ्ग और नपुंसक लिङ्ग दोनों में होते हैं ।

८६/५२. योपधः ।

व्याख्या– 'य' उपधायां यस्य स योपधः । अदन्तः योपधः पुंसि स्यात् । यथा हयः— हय् (हि) + अच्, गवयः— गो + अय् + अच् 'दृष्टः कथञ्चिद्गवयैर्विविग्नैः' (कुमार०-१।५६), समय सम् + इ + अच् 'मिथः समयात्' (श०) ।

हिन्दी– 'य' उपधा वाले अदन्त शब्द हय, गवय और समय पुंल्लिङ्ग में होते हैं ।

८७/५३. किसलयहृदयेन्द्रियोत्तरीयाणि नपुंसके । अत्रेतरेतरद्वन्द्वसमासः । पूर्वसूत्रापवादः ।

व्याख्या– किसलय-हृदय-इन्द्रिय-उत्तरीयाणि नपुंसके भवन्तीति । यथा– इदं किसलयम्— किञ्चित् शलति– किम् + शल् + क (कयन्) पृषोद्यरादित्वात्साधुः, 'अधरः किसलयरागः' (शा० १।२१); इदं इन्द्रियम्— इन्द्र + घ–इय्, पञ्च कर्मेन्द्रियाणि पञ्च ज्ञानेन्द्रियाणि च ।

हिन्दी– 'य' उपधा वाले अदन्त किसलय, हृदय और इन्द्रिय आदि शब्द नपुंसक लिङ्ग में होते हैं ।

८८/५४. गोमयकषायमलयान्वयाव्ययानि नपुंसके च । अत्रेतरेतरद्वन्द्वसमासः ।

व्याख्या– योपधा अकारान्ताः गोमय-कषाय-मलय-अन्वय-अव्यय— एते शब्दाः पुंसि नपुंसके च भवन्ति । तद्यथा— अयं गोमयः-इदं गोमयम्— गो + मयट्, कषायः-कषायम्— कषति कण्ठं– कष् + आय, 'स्फुटितकमलामोदमैत्री कषायः' (मेघ०-३१) । मलयः-मलयम्— मलते धरति चन्दनादिकम्, 'ललितलवङ्गलतापरिशीलन-कोमलमलयसमीरे' (गीत०-१); अन्वय— अनु + इ + अच्; अव्यय— 'य एनमजमव्ययम्' (भग० २।२१) ।

हिन्दी– 'य' उपधा वाले अकारान्त गोमय, कषाय, मलय, अन्वय और अव्यय शब्द पुंल्लिङ्ग और नपुंसक लिङ्ग में होते हैं।

८९/५५. रोपधः। यस्योपधायां 'र' इति स रोपधः (बहुव्रीहिसमासः)।

व्याख्या– अदन्तः रोपधः पुंसि (पुंल्लिङ्गे) स्यात्। यथा– अयं क्षुरः— क्षुर + क, अयमङ्कुरः— अङ्क + उरच् 'दर्भाङ्कुरेण चरणः क्षतः' (श०-२।१०)।

हिन्दी– 'र' उपधा वाले अदन्त शब्द पुंल्लिङ्ग में होते हैं। जैसे— क्षुर, अङ्कुर आदि।

९०/५६. द्वाराग्रस्फारतक्रवक्रवप्रक्षिप्रक्षुद्रच्छिद्रनारतीरदूरकृच्छ्ररन्ध्राश्रश्वभ्र-भीरगभीरक्रूरविचित्रकेयूरकेदारोदराजस्रशरीरकन्दरमन्दरपञ्जराजरजठराजिरवैरचामर-पुष्करगह्वरकुहरकुटीरकुलीरचत्वरकाश्मीरनीराम्बरशिशिरतन्त्रयन्त्रक्षत्रक्षेत्रमित्रकलत्र-च्छत्रमूत्रसूत्रवक्त्रनेत्रगोत्राङ्गुलित्रभलत्रास्त्रशस्त्रशास्त्रवस्त्रपत्रपात्रनक्षत्राणि नपुंसके। द्वाराग्र.....(च्छत्राणि) नक्षत्राणि इत्यत्र इतरेतरद्वन्द्वसमासः। पूर्वसूत्रापवादः।

व्याख्या– प्रस्तुतसूत्रे प्रस्तुताः द्वार, अग्र, स्फार, तक्र, वक्र, वप्र, क्षिप्र, क्षुद्र, नार (क्वचित् पार), तीर, दूर, कृच्छ्र, रन्ध्र, अश्र (स्र), श्वभ्र (क्वचित् शुभ्र), भीर, गभीर, क्रूर, विचित्र, केयूर, केदार, उदर, अजस्र, शरीर, कन्दर, पञ्जर, अजर, जठर, अजिर, वैर, चामर, पुष्कर, गह्वर, कुहर (क्वचिन्न), कुटीर, कुलीर, चत्वर, काश्मीर, नीर, अम्बर, शिशिर, तन्त्र, यन्त्र, क्षत्र, क्षेत्र, मित्र, कलत्र, च्छत्र, मूत्र, सूत्र, वक्त्र, नेत्र, गोत्र, अङ्गुलित्र, भलत्र (क्वचित् तनुत्र + अस्त्र), शस्त्र, शास्त्र, वस्त्र, पत्र, पात्र, नक्षत्र (क्वचित् च्छत्र इत्यपि)— इमे 'र' उपधावन्त अकारान्ताः शब्दाः नपुंसक लिङ्गे भवन्ति। इदं द्वारम् इत्यादिः।

विशेषः– अत्र 'स्फार'शब्दो रोगभेदवाची, प्रकाशवाची तु विशेष्यलिङ्ग एव। 'वक्र' शब्दः नद्याः पुटभेदवाची, कुटिलवाची तु विशेष्यलिङ्गः। 'क्षिप्रः' शीघ्रार्थे तद्वति विशेष्यलिङ्गः। 'क्षुद्र'शब्दः उपद्रवभेदे तद्वति विशेष्यलिङ्गः। 'दूर'शब्दो दूरत्वे, 'कृच्छ्र'शब्दः कृच्छ्रत्वे, तद्वति तु विशेष्यलिङ्गः। 'क्रूरं' क्रौर्ये, क्रौर्यवति त्रिलिङ्गत्वम्। 'चित्रं' वर्णे तद्वति त्रिलिङ्गत्वम्। 'अजस्रं' सातत्ये तद्वति त्रिलिङ्गत्वम्। 'शिशिरं' शीतलस्पर्शे तद्वति त्रिलिङ्गत्वम्।

हिन्दी– 'र' उपधा वाले अकारान्त द्वार से लेकर नक्षत्र तक सभी शब्द नपुंसक लिङ्ग में होते हैं। विशेष अर्थ में अन्य लिङ्ग भी होते हैं। संस्कृत व्याख्या से अवगत करें।

९१/५७. शुक्रमदेवतायाम् । अत्र नञ्तत्पुरुषसमासः । तद्यथा— न देवतेत्यदेवता, तस्यामदेवतायामिति ।

व्याख्या– देवभिन्नार्थे शुक्रशब्दः क्लीबे (नपुंसके) स्यात् । यथा— इदं शुक्रं = रेतः । शुभ्रवर्णवाची तु गुणवचनत्वाद्विशेष्यलिङ्गः । देवे तु पुमान् । व्युत्पत्तिः प्रयोगश्च— शुक्रम्— शुच् + रक् नि० कुत्वम् 'पुमान् पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः' (मनु०-३।६९) ।

हिन्दी– देवताभिन्न अर्थ में अर्थात् 'वीर्य' अर्थ में 'र' उपधा वाला अदन्त 'शुक्र' शब्द नपुंसक लिङ्ग में 'शुक्रम्' होगा और देवता (ग्रहविशेष) अर्थ में 'शुक्रः' (पुंल्लिङ्ग) होता है ।

९२/५८. चक्रवज्रान्धकारसारावारपारक्षीरतोमरशृङ्गारभृङ्गारमन्दारोशीरतिमिरशिशिराणि नपुंसके च । चक्र....शिशिराणि— इतरेतरद्वन्द्वसमासोऽत्र ।

व्याख्या– 'र'-उपधावन्तः अकारान्ताः चक्र-वज्र-अन्धकार-सार-अवार-पार-क्षीर-तोमर-शृङ्गार-भृङ्गार-मन्दार-उशीर-तिमिर-शिशिर— एते शब्दाः क्लीबे चात् पुंसि च स्युः । अन्यत्र व्याख्यायां चकारात् क्लीबत्वस्य ग्रहणम् । तेन न कापि क्षतिः । यथा— इदं चक्रं, अयं चक्र इत्यादि सर्वत्रोह्यम् । शिशिरशब्दस्तु हिमे स्पर्शे च पुं-नपुंसकलिङ्गः, स्पर्शवति त्रिलिङ्गः ।

हिन्दी– 'र' उपधा वाले अकारान्त चक्र, वज्र, अन्धकार, सार, अवार, पार, क्षीर, तोमर, शृङ्गार, भृङ्गार, मन्दार, उशीर, तिमिर और शिशिर शब्द नपुंसक तथा पुंल्लिङ्ग में होते हैं ।

९३/५९. षोपधः । 'ष'-उपधायामस्ति यस्य शब्दस्य स षोपध इत्युच्यते (बहुव्रीहिसमासः) ।

व्याख्या– अदन्तः (अकारान्तः) षोपधः शब्दः पुंसि स्यात्, पुंल्लिङ्गे भवेदित्याशयः । तथा च— वृषः– वृष् + क 'असम्पदस्तस्य वृषेण गच्छतः' (कुमार०-५।८०) । वृक्षः— व्रश्च + क्स् 'आत्मापराधवृक्षाणां फलान्येतानि देहिनाम्' । यक्षः— यक्ष्यते यक्ष् + (कर्मणि) घञ् 'यक्षश्चक्रे जनकतनया स्नान' (मेघदूत) ।

हिन्दी– 'ष' उपधा वाले अकारान्त वृष, वृक्ष और यक्ष शब्द पुंल्लिङ्ग में होते हैं ।

९४/६०. शिरीषर्जीषाम्बरीषपीयूषपुरीषकिल्विषकल्माषाणि नपुंसके । शिरीष...... कल्माषाणि (इतरेतरद्वन्द्वसमासः) । पूर्वसूत्रापवादः ।

व्याख्या– 'ष'-उपधावन्त: अकारान्ता: शिरीष, ऋजीष (जोष), अम्बरीष, पीयूष, पुरीष, किल्विष, कल्माष— इमे शब्दा: नपुंसकलिङ्गे भवन्ति । तद्यथा– इदं शिरीषम्— शृ + ईषन् किच्च 'पुष्पं शिरीषपुष्पादपि सौकुमार्यौ बाहू तदीयाविति मे वितर्क:' । ऋजीषम्— ऋच् + ईषन्, जोषम्— जुष् + घञ् (अव्यय); एवमन्येऽपि शब्दा: ।

हिन्दी– 'ष' उपधा वाले अकारान्त शिरीष, ऋजीष (जोष), अम्बरीष, पीयूष आदि शब्द नपुंसक लिङ्ग में होते हैं ।

९५/६१. यूषकरीषमिषविषवर्षाणि नपुंसके च । यूष....वर्षाणि— इतरेतरद्वन्द्व-समास: ।

व्याख्या– षकारोपधावन्त: अकारान्ता: यूष-करीष-मिष-विष-वर्षशब्दा: पुंसि, नपुंसकलिङ्गे च भवन्ति (नपुंसके पुंसि वा) । तद्यथा— यूष: यूषं वा— यूष् + क कविन् वा, करीष— कृ + ईषन्, मिष— 'स रोमकूपौघमिषाज्जगत्कृता कृताश्च किं दूषणशून्यबिन्दव:' (नैषध-१।२१) । विषम्-विष:— विष् + क 'विषं भवतु मा भूद्वा फटाटोपो भयङ्कर:' (पञ्च०-१।२०४) । वर्ष:-वर्षम्— वृष् भावे घञ् कर्तरि अच् वा 'इयन्ति वर्षाणि तया सहोग्रमभ्यस्यतीव' (रघु०-१३।६७) ।

हिन्दी– षकार उपधा वाले अकारान्त यूष, करीष, मिष, विष और वर्ष शब्द नपुंसक और पुंलिङ्ग में होते हैं ।

९६/६२. सोपध: । 'स' उपधा अस्ति यस्य शब्दस्य स: सोपध: ।

व्याख्या– अदन्त: (अकारान्त:) सोपध: शब्द: पुंसि स्यात् । यथा– अयं वत्स:— वद् + स: 'यं सर्वशैला: परिकल्प्य वत्सं' (कुमार०-१।२), वायस:— वयोऽसच् णित् 'बलिमिव परिभोक्तुं वायसास्तर्कयन्ति' (मृच्छ०-१०।३), महानस: आदि ।

हिन्दी– 'स' उपधा वाले अकारान्त शब्द पुंल्लिङ्ग में होते हैं । जैसे— वत्स, वायस, महानस आदि ।

९७/६३. पनसबिसबुससाहसानि नपुंसके । पनस (क्वचित् 'मानस' इति पाठ:) । नपुंसके इतरेतरद्वन्द्वसमास: ।

व्याख्या– पनस (मानस)-बिस-बुस-साहस-(सोपधा:)-शब्दा: एते क्लीबे स्युरिति । तद्यथा– इदं पनसम्— पनाय्यते स्तूयतेऽनेन देव:– पन् + असच् (फलार्थे), इदं मानसम्— मन एव, मनस इदं वा अण् 'सपदि मदनानलो दहति मम मानसम्' (गीत०-१०), बिसम्— बिस् + क 'पाथेयमुत्सृज बिसं ग्रहणाय भूय:' (विक्रम०-

४।१५), बुसम्— बुस् + क, पक्षे— पृषोदरादित्वात् षत्वम् । साहसम्— सहसा बलेन निर्वृत्तम्- अण् 'तदपि साहसाभासम् ।

हिन्दी– 'स' उपधा वाले अकारान्त पनस, मानस, बिस, बुस और साहस शब्द नपुंसक लिङ्ग में होते हैं ।

९८/६४. चमसांसरसनिर्यासोपवासकार्पासवासमासकासकांसमांसानि नपुंसके च । चमस-अंस-रस..(चमस-सरस इति क्वचित्पाठः)..मांसानि, इतरेतरद्वन्द्वसमासोऽत्र ।

व्याख्या– चमस-अंस-रस-(चमस-सरस)-निर्यास-उपवास-कार्पास-वास-भास-कास-कांस-मांस— एते शब्दाः पुं-नपुंसकयोः स्युरिति । तद्यथा– अयं चमसः-इदं चमसम्— चमत्यस्मिन् चम + असच् तारा०, अंसः-अंसम्— अंस् + अच्, रस— रस् + अच्, सरस (रसेन सह— बहुव्रीहिसमासः), निर्यासः-निर्यासम्— निर + यस् + घञ् 'शालनिर्यासगन्धिभिः' (रघु०-१।३८), उपवास— उपवस + घञ् 'सोपवास-स्त्र्यहं वसेत्' (याज्ञ०-१।१७५), कार्पासः-कार्पासम्— कर्पास + अण् । एवमन्येऽपि शब्दाः उभयलिङ्गिनः सन्ति ।

हिन्दी– 'स' उपधा वाले अकारान्त चमस, अंस, रस, सरस, निर्यास, उपवास आदि शब्द उभयलिङ्गी (पुंल्लिङ्ग-नपुंसकलिङ्ग) होते हैं ।

९९/६५. कंसं चाप्राणिनि ।

व्याख्या– न प्राणी = अप्राणी, तस्मिन् अप्राणिनि— नञ्तत्पुरुषसमासः । अ-प्राणिनि कंसशब्दः क्लीबे (नपुंसके) पुंसि (पुंल्लिङ्गे) च स्यात् । कंसं कंसः पानं भोजनम्, मथुरानृपे तु कंसः चकारोऽदन्ताधिकारसमाप्त्यर्थः । (कंस् + अ) निष्कर्षश्चात्र प्राणरहिते वस्तुनि कंसशब्दः नपुंसकलिङ्गे, एवञ्च प्राणिनि जीवे पुंल्लिङ्गः; यथा— श्रीकृष्णद्वेष्टा उग्रसेनपुत्रः कंसः ।

हिन्दी– 'स' उपधा वाला अकारान्त कंस शब्द अप्राणि (निर्जीव) अर्थात् पानपात्र के अर्थ में नपुंसक और 'मथुराधिपति उग्रसेनपुत्र कंस' के अर्थ में पुल्लिङ्ग होता है । 'च' शब्द अकारान्तनिवर्त्तक है ।

१००/६६. रश्मिदिवसाभिधानानि । अत्र द्वन्द्वगर्भस्तत्पुरुषसमासः ।

व्याख्या– रश्मि-दिवसशब्दयो; ये च पर्यायवाचकाः शब्दाः भवन्ति तेऽपि पुंसि (पुंल्लिङ्गे) भवेयुरिति । तद्यथा– रश्मिः— अश् + मि धाताष्ट्र, रश् + मि वा, 'मुक्तेषु रश्मिषु निरायतपूर्वकाया' (श०-१।८) । एवमेव मयूखः— मा + ऊख, मयादेशः;

दिवसः— दीव्यतेऽत्र दिव् + असच् किक् च; घस्रः— घस् + रक् 'घस्रो गमिष्यति' (सुभा०) ।

हिन्दी– पर्यायवाची सहि, रश्मि और दिवस शब्द पुंल्लिङ्ग में होते हैं । जैसे— रश्मि, मयूख, दिवस, घस्र आदि ।

१०१/६७. दीधितिः स्त्रियाम् ।

व्याख्या– पूर्वसूत्रापवादः । दीधितिशब्दः स्त्रियां = स्त्रीलिङ्गे भवति । यथा– इयं दीधितिः— दीधी + क्तिन्, इट् ईकारलोपश्च ।

हिन्दी– 'दीधिति' शब्द स्त्रीलिङ्ग में होता है ।

१०२/६८. दिनाहनी नपुंसके । दिनं च अहश्चेति दिनाहनी— इतरेतरद्वन्द्व-समासोऽत्र ।

व्याख्या– दिवसाभिधानत्वे पुंस्त्वे प्राप्ते तदपवादः । दिन-अहन्-शब्दौ नपुंसकलिङ्गे भवतः । यथा– इदं दिनम्— द्युतितमः दो (दी) + नक्, ह्रस्वः 'दिनान्ते निहितं तेजः' (रघु०-४।१) ।

हिन्दी– दिन और अहन्— ये दोनों शब्द पुंस्त्व को बाध कर नपुंसक लिङ्ग में होते हैं।

१०३/६९. मानाभिधानानि । मानस्याभिधानानि = नामानि, तत्पुरुषसमासोऽत्र ।

व्याख्या– मीयतेऽनेनेति मानं, तद्विशेषाभिधानानि पुंसि (पुंल्लिङ्गे) स्युरिति । तद्यथा– अयं कुडवः (पः)— कुड् + कवन् कपन् वा, प्रस्थः— प्र + क, ३२ पलानां मानम् ।

हिन्दी– मान (परिमाण) वाचक शब्द पुंल्लिङ्ग में होते हैं । यथा— कुडव, प्रस्थ ।

१०४/७०. द्रोणाढकौ नपुंसके च । द्रोणश्चाढकश्च द्रोणाढकौ, इतरेतरद्वन्द्वसमासः ।

व्याख्या– मानविशेषवाचित्वेन पुंस्त्वे प्राप्ते पक्षे क्लीबतायै सूत्रम् । अतः द्रोण-आढकशब्दौ उभयोः (पुंस्त्वे क्लीबे च) लिङ्गयोर्भवतः । तद्यथा— द्रोणः-द्रोणम्, आढकः-आढकम् ।

हिन्दी– (परिमाणवाची) द्रोण और आढक शब्द पुंल्लिङ्ग तथा नपुंसक लिङ्ग दोनों में होते हैं ।

१०५/७१. खारीमानिके स्त्रियाम् । खारी च मानिका चेति, इतरेतरद्वन्द्वसमासोऽत्र ।

व्याख्या– पुंस्त्वापवादार्थं सूत्रम् । खारी-मानिकाशब्दौ स्त्रीलिङ्गे भवतः । यथा इयं खारी— खम् = आकाशम् आधिक्येन ऋच्छति– ख + ऋ + अण्, ख + आ + रा + क + ङीष्, षोडशद्रोणतुल्यं मानम् । इयं मानिका— मन् + णिच् + ण्वुल् + टाप्, मानम् ।

हिन्दी– परिमाणवाची खारी और मानिका शब्द स्त्रीलिङ्ग में होते हैं ।

१०६/७२. दाराक्षतलाजासूनां बहुत्वं च । दारा....लाजासूनां, इतरेतरद्वन्द्व-समासोऽत्र ।

व्याख्या– दारशब्दस्य स्त्रीत्वे प्राप्ते रोपधत्वेन पुंस्त्वसिद्धावपि बहुत्वार्थमन्ययोर-प्राप्तौ बहुत्वार्थञ्च सूत्रम् । दार-अक्षत-लाजा-असु— एते शब्दाः पुंसि नित्यबहुवचनान्ताश्च स्युरिति । अत्र असुशब्दः चिन्त्यः । प्राचीने नवीने च संस्करणेऽस्मिन् सूत्रे असुशब्दस्य ग्रहणं नास्ति, सिद्धान्तकौमुद्यां विद्यते । प्रयोगाश्च इमे दाराः, अक्षताः, लाजाः असवश्चेति ।

हिन्दी– नित्य बहुवचनान्त दार, अक्षत, लाजा और असु शब्द पुंल्लिङ्ग में होते हैं ।

१०७/७३. नाड्यपजनोपपदानि व्रणाङ्गपदानि । नाड्यप....व्रणाङ्गपदानि इत्यत्र द्वन्द्वात्मको बहुव्रीहिसमासः ।

व्याख्या– नाडीपूर्वपदः व्रणान्तशब्दः, अपपूर्वकोऽङ्गशब्दः जनपूर्वः पदशब्दश्च पुंसि (पुल्लिङ्गे) स्यात् । परवल्लिङ्गत्वेन क्लीबादिलिङ्गत्वे प्राप्ते नित्यपुंस्त्वार्थमारम्भः । तद्यथा— नाड़ीव्रणः, अपाङ्गः, जनपदः । व्युत्पत्तिः– नाड़ीव्रणः नड् + णिच् + इन्– नाडि + ङीष् + व्रणः; अपाङ्गः— अपाङ्गं = तिर्यक् चलति नेत्रं यत्र– अप् + अङ्ग + घञ् कन् च ।

हिन्दी– 'नाड़ी' पूर्वपदक व्रणान्त शब्द, अपपूर्वक अङ्ग शब्द और जनपूर्वक पद शब्द पुंल्लिङ्ग में होता है ।

१०८/७४. मरुद्गरुदुत्तरदृत्विजः । मरुद्-गरुद्-उत्तरद्-ऋत्विजः– इतरेतरद्वन्द्व-समासः ।

व्याख्या– मरुत्, गरुत्, उत्तरत्, ऋत्विज्— इत्येते शब्दाः पुंसि स्युः । यथा– अयं मरुत्— मृ + उति 'दिशः प्रसेदुर्मरुतो ववुः सुखाः' (रघु०-३।१४), अयं गरुत्— गृ (गु) + उति, उत्तरत्— उद् + तरप् वा उत्पूर्वात् तरतेरतिप्रत्ययान्तः । शतृप्रत्ययान्तस्तु त्रिलिङ्गः । तरन् तरन्तो तरत् । अयम् ऋत्विक्— ऋतु + अज् + क्विन् ।

हिन्दी– मरुत्, गरुत्, उत्तरत्, ऋत्विज— ये शब्द पुंलिङ्ग में होते हैं ।

१०९/७५. ऋषिराशिदृतिग्रन्थिक्रिमिध्वनिबलिकौलिमौलिरविकविकपिमुनयः ।

'ऋषिराशि....मुनय' इत्यत्र इतरेतरद्वन्द्वसमासः; कलिकातासंस्करणे च 'दृति'स्थाने 'धृति', 'ग्रन्थि'स्थाने 'ग्रहि' इति च पाठो विद्यते ।

व्याख्या– ऋषि-राशि-दृति-(धृति)-ग्रन्थि-(ग्रहि)-क्रिमि-बलि-कौलि-मौलि-रवि-कवि-कपि-मुनि— एते शब्दाः पुंसि स्युः । अयमृषिः राशिः— ऋष् + इन् + कित्, अश्नुते = व्याप्नोति– अश् + इञ्, धातोरुडागमश्च; बलिः पूजोपहारे, राजग्राह्ये करे दानवभेदे एव, पुमान् उदरावयवे तु स्त्रीलिङ्गाधिकारस्थेन (२५) सूत्रेण स्त्रीलिङ्ग इति भेदः ।

हिन्दी– ऋषि, राशि, दृति (धृति), ग्रन्थि (ग्रहि), क्रिमि, बलि, कौलि, मौलि, रवि, कवि, कपि और मुनि— ये शब्द पुंल्लिङ्ग में होते हैं ।

११०/७६. ध्वजगजमुञ्जपुञ्जाः । ध्वज.....पुञ्जाः– इतरेतरद्वन्द्वसमासोऽत्र ।

व्याख्या– ध्वज-गज-मुञ्ज-पुञ्ज— एते शब्दाः पुंसि स्युः । ध्वजः = पताका, 'ध्वजमस्त्रियाम्' (२।८।९९) इत्यमरोक्तिः अपाणिनीयतयोपेक्ष्या मूलं तस्य मृग्यम्; अयं ध्वजः— ध्वज् + अच्, इदं ध्वजमिति वा (अमर०) । अयं गजः— गज् + अच्, 'कचा-चितौ विश्वगिवागजौ गजौ' (कि०-१।३६) । अयं मुञ्जः— मुञ्ज + अच्, अयं पुञ्जः— पुस् + जि + ड, 'क्षीरोदवेलेव सफेनपुञ्जाः' (कुमार०-७।२६) ।

हिन्दी– ध्वज, गज, मुञ्ज और पुंज शब्द पुंल्लिङ्ग में होते हैं ।

१११/७७. हस्तकुन्तान्तवातव्रातदूतधूर्तसूतचूतमुहूर्ताः । हस्त...मुहूर्ताः– इतरेतर-द्वन्द्वसमासः ।

व्याख्या– हस्त-कुन्त-अन्त-वात-व्रात-दूत-धूर्त-सूत-चूत-मुहूर्त— एते शब्दाः पुंसि स्युः । हस्तः सूतः सारथौ प्रसूते तु त्रिलिङ्गः । 'मुहूर्त्तोऽस्त्रियाम्' इत्यमरोक्तिश्चिन्त्यमूला । अयं हस्तः— हस् + तन् ,न इट्, 'गौतमी हस्ते विसर्जयिष्यामि' (शा०-३); अयं कुन्तः— कु + उन्द + क्त वा० शाक० पररूपम्, 'कुन्ताः प्रविशन्ति' (काव्य०-२) । अन्तः— अम् + तन्, वातः— वा + क्त, व्रातः— वृ + अतच् (पृषोदरादित्वात्साधुः) 'श्वपाकानां व्रातैः' (गंगा०-२९) । दूतः— दु + क्त, दीर्घश्च, धूर्तः— धूर्व- धूर् + क्त, 'धूर्तोऽपरां चुम्बति', सूतः— सू + क्त, चूतः— चूष् + क्त, मुहूर्तः— हुर्छ् + क्त, धातोः पूर्वं मुट् च ।

हिन्दी– हस्त, कुन्त, अन्त, वात, व्रात, दूत, धूर्त, सूत, चूत और मुहूर्त— ये शब्द पुंल्लिङ्ग में होते हैं ।

११२/७८. षण्डमण्डकरण्डभरण्डवरण्डतुण्डगण्डमुण्डषण्डशिखण्डा: । षण्ड... शिखण्डा: (इतरेतरद्वन्द्वसमास:) ।

व्याख्या– षण्ड-मण्ड-करण्ड-भरण्ड-(रण्डविशेष:–पा० कलि०)-वरण्ड-तुण्ड-गण्ड-मुण्ड-पाषण्ड-शिखण्ड— एते शब्दा: पुंल्लिङ्गवाचका: सन्ति । अयं षण्ड:— सन् + ढ, पृषोदरादित्वात् षत्वम्; मण्ड:— मण्ड् + अच्, मन् + ड, तस्य नेत्वं वा; करण्ड:— कृ + अण्डन्, 'करण्डपीडिततनो: भोगिन:' (भर्तृ०-२।८४); भरण्ड— भृ + कण्डन्, रण्ड:— रम् + ड), वरण्ड:— वृ + अण्डच्, तुण्ड— तुण्ड + अच्, कोशे 'तुण्डमि'ति नपुंसक:; गण्ड:— गण्ड् + अंच्, मुण्ड:— मुण्ड् + अच् ।

हिन्दी– षण्ड, मण्ड, करण्ड, भरण्ड, वरण्ड, तुण्ड, गण्ड, मुण्ड, पाषण्ड और शिखण्ड शब्द पुंल्लिङ्ग में होते हैं ।

११३/७९. वंशांशपुरोडाशा: । वंशश्च अंशश्च पुरोडाशश्च, चार्थे द्वन्द्वसमास: ।

व्याख्या– वंश-अंश-पुरोडाश— एते शब्दा: पुंसि (पुंल्लिङ्गे) स्युरिति । तद्यथा– अयं वंश:— वमति उद्गिरति वम् + श, तस्य नेत्वम्; 'धनुर्वंशविशुद्धोऽपि निर्गुण: किं करिष्यति' (हि० प्र०-२३) । अयमंश:— अंश् + अच्, 'सकृदंशो निपतति' (मनु०-९।४७) । अयं पुरोडाश:— पुरोडाश्– डाश: ।

हिन्दी– वंश, अंश और पुरोडाश शब्द पुंल्लिङ्ग में होते हैं ।

११४/८०. ह्रदकन्दकुन्दबुद्बुदशब्दा: । ह्रद...शब्दा:- इतरेतरद्वन्द्वसमासोऽत्र ।

व्याख्या– ह्रद-कन्द-कुन्द-बुद्बुद-शब्द— एते शब्दा: पुंसि भवन्ति । तद्यथा– अयं ह्रद:— ह्लाद् + अच् नि०, अयं कन्द:— कन्द् + अच्, कुन्द:— कु + दै (दो) + क, नि० मुम् अथवा कु + दत् + नुम्, बुद्बुद:— 'सततं जातविनष्टा: पयसामिव बुद्बुदा: पयसि' । शब्द:— शब्द् + घञ्, 'विश्वासोपगमादभिन्नगतय: शब्दं सहन्ते मृगा:' (शा०-१।१४) ।

हिन्दी– ह्रद, कन्द, कुन्द, बुद्बुद और शब्द— ये शब्द पुंल्लिङ्ग में होते हैं ।

११५/८१. अर्घपथिमथ्यृभुक्षिस्तम्बनितम्बपूगा: । अर्घ....पुगा:– इतरेतरद्वन्द्व-समास: ।

व्याख्या– अर्घ-पथि(न्)-मथि(न्)-स्तम्ब-नितम्ब-पूग— इत्येते शब्दा: पुंसि भवन्ति । तद्यथा— अर्घ + घञ्, 'कुत्स्या: स्यु: कुपरीक्षका हि मणयो यैरर्घत: पातिता:' (भर्तृ०-२।१५) 'आप: क्षीरं कुशाग्रञ्च दधिसर्पि: सतुण्डलम् । यव: सिद्धार्थकश्चैव अष्टाङ्गोऽर्घ: प्रकीर्त्तित:' ।। एषोऽर्घ: । पथिन्— पथ् + आधारे इनि, मथिन्— मथ्

+ इनि, ऋभुक्षिन्— ऋभुक्षः वज्रं स्वर्गो वास्यास्ति– इनि, स्तम्बः— स्था + अम्बच् किच्च पृषो०, नितम्बः— 'निभृतं तभ्यते कामुकैः' तभु कांक्षायाम्, पूगः— पूं + गन्, कित्। अस्मिन् सूत्रे कलिकातासंस्करणे 'मथि'स्थाने 'सखि'शब्दो विद्यते।

हिन्दी– अर्घ, पथिन्, मथिन्, ऋभुक्षिन्, स्तम्ब, नितम्ब और पूग— ये शब्द पुंल्लिङ्ग में होते हैं।

११६/८२. पल्लवपल्वलकफरेफकटाहनिर्व्यूहमठमणितरङ्गतुरङ्गगन्धस्कन्धमृदङ्गसङ्गसमुद्रपुङ्खाः। पल्लव......पुङ्ख– इतरेतरद्वन्द्वसमासः।

व्याख्या– पल्लव-पल्वल-(पल्लल–क०)-कफ-रेफ-कटाह-निर्व्यूह-(निर्य्यूह–क०)-मठ-मणि-तरङ्ग-तुरङ्ग-गन्ध-स्कन्ध-मृदङ्ग-सङ्ग-समुद्र-पुङ्ख— एते शब्दाः पुंसि (पुंल्लिङ्गाः) स्युरिति। तद्यथा– अयं पल्लवः— पल् + क्विप् + ल + अप् = लव, पल् चासौ लवश्च (कर्मधारयसमासः) 'पल्लवोऽस्त्री' इत्यमरोक्तिश्चिन्त्यमूला कोशानुसारेण क्लीबे– पल्लवमित्यपि। पल्वलः— पल् + ववच्, कोशानुसारेण क्लीबे– पल्वलम्। कफः— केन जलेन फलति– फल् + ड तास, 'प्राणप्रयाणसमये कफवातपित्तैः' (उद्भट०)। रेफः— रिफ + अच्, कटाहः— कट + आ + हन् + ड, निर्व्यूह— निर् + वि + वह् + घञ्, निर्यूह— निर् + उह् + कः (पृषोदरादित्वात्साधुः), मठः— मठ् (घञर्थे) क।

हिन्दी– पल्लव, पल्वल (पल्लल), कफ, रेफ, कटाह, निर्व्यूह, निर्य्यूह आदि शब्द पुंल्लिङ्ग में होते हैं।

११७/८३. सारथ्यतिथिकुक्षिबस्तिपाण्यञ्जलयः। सारथि...अञ्जलयः– इतरेतरद्वन्द्वसमासः।

व्याख्या– सारथि-अतिथि-कुक्षि-बस्ति-पाणि-अञ्जलि— एते शब्दाः पुंसि स्युरिति। क्वचित् पुस्तके (कलिकातासंस्करणे पाणिशब्दस्य ग्रहणं नास्ति। तद्यथा– अयं सारथिः— सृ + अथिण्, सह रथेन सरथः घोटकः, तत्र नियुक्तः इञ् वा) 'मातलिसारथिर्ययौ' (रघु०-३।६७)। अतिथिः— अतति गच्छति, न तिष्ठति– अत् + इथिन्, 'एकरात्रन्तु निवसन्नतिथिर्ब्राह्मणः स्मृतः' (मनु०-३।१०२)। कुक्षिः— कुक् + क्सि। वस्तिः— वस् + तिः। पाणिः— पण् + इण्, 'दानेन पाणिर्न तु कङ्कणेन' (भर्तृ०-२।७१)। अञ्जलिः— अञ्ज + अलि, 'सुपूरो मूषिकाञ्जलिः' (पञ्च०१।२५)।

हिन्दी– सारथि, अतिथि, कुक्षि, वस्ति, पाणि और अञ्जलि शब्द पुंल्लिङ्ग में होते हैं।

इति पुंल्लिङ्गप्रकरणम्

अथ नपुंसकलिङ्गप्रकरणम्

११८/१. नपुंसकम् । अधिकारोऽयम्, न पुमान् न स्त्री नि० स्त्रीपुंसकयोः पुंसक आदेशः ।

व्याख्या– इत ऊर्ध्वं 'अक्षमिन्द्रिये' इति सूत्रान्तं यावत् वक्ष्यमाणाबाधमन्तरेण क्लीबलिङ्गाः स्युरित्यधिकारसूत्रमिदम् । यथास्थानमुदाहरणं द्रष्टव्यम् । पुंस्त्वादिलिङ्गलक्षणविषये— लिङ्गवचनविचारे— उक्तमस्ति यत्—

पुंस्त्वं तु लौकिकं मेढ्रवत्त्वं स्त्रीत्वं सयोनिता ।
अयोग्येन्द्रिययोगित्वं क्लीबत्वमवधार्यताम् ।।६।।

हिन्दी– 'नपुंसकम्' यह अधिकार है । यहाँ से लेकर 'अक्षमिन्द्रिये' इस अन्तिम सूत्र तक इसका अधिकार है, यदि बाधक सूत्र न हो तो ।

११९/२. भावे ल्युडन्तः । ल्युट्-प्रत्ययोऽन्ते यस्यासौ ल्युडन्तः (बहुव्रीहिसमासः) ।

व्याख्या– भावार्थकस्य ल्युट् प्रत्ययान्तो धातुः क्लीबे (नपुंसके) स्यादिति । तद्यथा गमनम्— गम् + ल्युट्, हसनम्— हस् + ल्युट् । भावे किम् ? पच्यतेऽनेनेति करणे ल्युट् पचनो दहनोऽग्निः । इध्मप्रव्रश्चनः कुठारः पाषाणदारणः टङ्कः ।

हिन्दी– भावार्थक ल्युट् प्रत्ययान्त धातु नपुंसकलिङ्ग में होता है । जैसे— गमनम्, हसनम् आदि ।

१२०/३. निष्ठा च । क्तप्रत्ययान्तस्य बोधको निष्ठाप्रत्ययः— क्तक्तवतु निष्ठेति ।

व्याख्या– भावार्थकनिष्ठाप्रत्ययान्तो धातुः क्लीबे (नपुंसक लिङ्गे) स्यादिति । हसितम्— हस् + क्त, गीतम्— गै + क्त, 'आर्ये साधु गीतम्' (शाकुन्तलम्-१); वृत्तम्— वृत् + क्त, 'सतां वृत्तमनुण्ठिताः' (मनु०-१०।१२७) ।

हिन्दी– 'क्त' प्रत्यय का बोधक निष्ठा है, भावार्थक निष्ठा प्रत्ययान्त धातु नपुंसक लिङ्ग में होता है ।

१२१/४. त्वष्यञौ तद्धितौ । त्व-ष्यञौ-तद्धितौ— इतरेतरद्वन्द्वसमासोऽत्र ।

व्याख्या– भावे इत्यनुवर्तते पूर्वसूत्रात् । अर्थात् भावे विहिता ये त्व-ष्यञौ तद्धितौ, तदन्ताः क्लीबे स्युः । यथा— भावे शुभ्रत्वं शौभ्रयम्— शुभ् + रक्, इदं जडत्वं

जाड्यम्— जड + त्व, जड + ष्यञ्, 'तज्जाड्यं वसुधाधिपस्य' (भर्तृ०-२।१५); शुक्लत्वं शौक्ल्यम्— शुच् + लुक् + कुत्वम्, शुक्ल + ष्यञ्, ष्यञः षित्वसामर्थ्यात्पक्षे स्त्रीत्वमपि, तेन 'षिद्गौरादि-भ्यश्च' इति ङीषि, यलोपे, औचिती—औचित्यं, माधुरी—माधुर्य, चातुरी—चातुर्य्यम् ।

हिन्दी– भाव में विहित 'त्व' और 'ष्यञ्' प्रत्ययान्त तद्धित शब्द नपुंसक लिङ्ग वाले होते हैं । जैसे— शुभ्रत्व, शौभ्रय आदि ।

१२२/५. कर्मणि च ब्राह्मणादिगुणवचनेभ्यः । बहुव्रीहिगर्भो द्वन्द्वसमासोऽत्र ।

व्याख्या– ब्राह्मणादिभ्यो गुणवचनेभ्यश्च कर्मणि चात् भावे यौ विहितौ त्व-ष्यञौ तदन्ताः क्लीबे स्युः । ब्राह्मणस्य कर्म भावो वा ब्राह्मणत्वं-ब्राह्मण्यम्— 'ब्रह्म वेदं शुद्धं चैतन्यं वा वेत्त्यधीते वा अण् + त्व, ब्राह्मण + ष्यञ् वा यत्, 'सत्यं शपे ब्राह्मण्येन' (मृच्छ०-५)। 'चातुर्वर्ण्यादीनां स्वार्थे उपसंख्यानम्' इति वार्त्तिकोक्तेः स्वार्थे ष्यञ्— चातुर्वण्यं, त्रैलोक्यमित्यादि । क्वचित् स्वार्थिका अपि प्रत्यया प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते इति भाष्योक्तेः ।

हिन्दी– कर्म तथा भाव में कृत त्व और ष्यञ् प्रत्यय वाले ब्राह्मणादि एवं गुणवचन शब्द नपुंसक लिङ्ग में होते हैं ।

१२३/६. यद्यढग्यगञण्वुञ्छाश्च भावकर्मणि । यद्य...ञ्छाश्च— इतरेतरद्वन्द्व-समासः ।

व्याख्या– भावे कर्मणि चार्थे विहिता ये यद्यदादयस्तदन्ताः क्लीबे (नपुंसके) स्युरिति । भावकर्मणीति ग्रहणं स्वार्थनिवृत्त्यर्थम् । स्तेनस्य भावः कर्म वा 'स्तेनाद्यत् नलोपश्च' (५।१।१२५) इति यति स्तेयम् । सख्युर्भावः कर्म वा 'सख्युर्य' (५।१।१२६) इति ये सख्यम् । कपेर्ज्ञातेः वा भावादि 'कपिज्ञात्योर्ढक्' (५।१।१२७) इति ढकि कापेयम्, ज्ञातेयम् । एवमेवान्यगृहीतप्रत्ययानां तत्तत्सूत्रैः उदाहरणानि ज्ञेयानि ।

हिन्दी– भाव तथा कर्म में प्रयुक्त तद्धित यत्, य, ढक्, यक्, अञ्, अण्, वुञ् और छ प्रत्यय से निष्पन्न शब्द नपुंसकलिङ्ग में होते हैं ।

७. अव्ययीभावः (सू० सं०-६५९–अ०-२।४।१८) ।

व्याख्या– अव्ययीभावसमासनिष्पन्नः शब्दः क्लीब-(नपुंसक)-लिङ्गः स्यात् । यथा— अधिस्त्रि स्त्रियामिति विग्रहे विभक्त्यर्थेऽव्ययीभावे तदन्तस्य क्लीबतया ह्रस्वः । उपनदिपक्षे अच् समासान्ते उपनदम्, यथाशक्ति इति ।

हिन्दी– अव्ययीभाव समास से निष्पन्न शब्द नपुंसक लिङ्ग वाला होता है। जैसे— अधिस्त्रि, उपनदम्, यथाशक्ति।

१२४/८. द्वन्द्वैकत्वम्। द्वन्द्व + एक त्वम्— षष्ठीतत्पुरुषसमासः।

व्याख्या– समाहारद्वन्द्वसमासनिष्पन्नाः शब्दाः क्लीबे (नपुंसकलिङ्गे) स्युरिति। यथा– पाणिपादम्— पण् + इण्, पद + घञ्; पाणी च पादौ चेति, धवखदिरम्— धु + अप् खद् + किरच्; धवश्च खदिरश्चेति। अत्र 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' (२।४।२) इति सूत्रस्थोदाहरणमपि बोध्यम्।

हिन्दी– समाहार द्वन्द्व समास से निष्पन्न शब्द नपुंसक लिङ्ग में होते हैं; जैसे— पाणिपादम्, धवखदिरम् आदि।

१२५/९. अभाषायां हेमन्तशिशिरावहोरात्रे च। अभाषायामित्यत्र नञ्समासः, ततः परं द्वन्द्वसमासः।

व्याख्या– संस्कृतभाषाभिन्ननियामके वेदे हेमन्तशिशिररूपो द्वन्द्वसमाहारः नैकवत् क्लीबलिङ्गो वा। किन्तु 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' इत्युक्ते परवल्लिङ्गता द्विवचनान्तता च तथा अहोरात्रशब्दो द्वन्द्वनिष्पन्नः क्लीब एव, 'रात्राह्नाहाः पुंसि' इति सूत्रपुंल्लिङ्गापवादः। अभाषायामित्युक्तेः भाषायां— हेमन्तशिशिरम्, अहोरात्र इत्येव।

हिन्दी– भाषाभिन्न वेद में हेमन्त-शिशिर तथा अहन् रात्रि में इनमें द्वन्द्व समासपूर्व शब्द के समान लिङ्ग होता है।

१२६/१०. अनञ्कर्मधारयस्तत्पुरुषः। अस्मिन्नधिकारसूत्रे द्वन्द्वगर्भो बहुव्रीहिसमासः।

व्याख्या– नञ् च कर्मधारयश्च, तौ नञ्कर्मधारयौ, नास्ति नञ्कर्मधारयौ यत्र स अनञ् कर्मधारयः। इतः परं नञ्कर्मधारयभिन्नस्तत्पुरुषोऽधिक्रियते। अर्थात् अधिकार-सूत्रत्वाद् नञ् भिन्नः कर्मधारयभिन्नश्च तत्पुरुषो नपुंसकलिङ्गो भवतीत्यर्थः। द्विगुः स्त्रियां चेति व्यवस्थया।

हिन्दी– यह अधिकारनिर्देशक है। नञ्भिन्न और कर्मधारयभिन्न तत्पुरुष शब्द नपुंसक लिङ्ग में होता है।

१२७/११. अनल्पे छाया। न अल्पम् अनल्पं, तस्मिन् अनल्पे— नञ् तत्पुरुषसमासोऽत्र।

व्याख्या– बहुसम्बन्धिनी या छाया तदन्तस्तत्पुरुषः क्लीबे (नपुंसकलिङ्गे) स्यात्।

नपुंसकत्वेन आपो ह्रस्वः । यथा— इक्षूणां छाया इक्षुच्छायम् । 'इक्षुच्छाया निषादिन्य' इति तु आनिषादिन्य इत्याङ् प्रश्लेषेण समर्थनीयम् । शराणां छाया शरच्छायमिति ।

हिन्दी– बाहुल्य अर्थ में जो छाया शब्द (तत्पुरुष), वह नपुंसक लिङ्ग में होता है ।

१२८/१२. राजाऽमनुष्यपूर्वा सभा । अत्र नञ्द्वन्द्वगर्भो बहुव्रीहिसमासो विज्ञेयः ।

व्याख्या– राजपर्य्यायपूर्वः मनुष्यभिन्नमनुष्यसदृशतुल्यपूर्वश्च छायान्तस्तत्पुरुषः क्लीबे स्यात् । यथा— नृपाणां सभा नृपसभम् । इनसभम् । राजपर्यायपूर्वस्यैवेष्यते, न तु राजस्वरूपविशेषपूर्वस्य । तेन राजसभा, चन्द्रगुप्तसभा । भाष्यकृता चन्द्रगुप्तसभेति प्रत्युदाहरणात् चन्द्रगुप्तस्य भाष्यकारसमकालत्वं ततः प्राक्कालत्वं वा प्रतीयते । अमनुष्येति पर्य्युदासात् तत् सदृशरक्षःपिशाचादिपूर्वकस्यैव, तेन रक्षःसभम्, पिशाचसभम् । तत्पूर्वकस्य किम् ? श्वसभा, मृगसभेत्यादि ।

हिन्दी– जहाँ राजपर्याय पूर्व में हो मनुष्यभिन्न अथवा मनुष्यसदृश पूर्व छायान्त तत्पुरुष शब्द नपुंसक लिङ्ग में हो । यथा— नृपसभम् इत्यादि में ।

१२९/१३. सुरासेनाच्छायाशालानिशाः स्त्रियां च । अत्रेतरेतरद्वन्द्वसमासः ।

व्याख्या– उपर्युक्तशब्दान्तः तत्पुरुषः स्त्रियां चात्क्लीबे च स्यात् । यथा— यव-सुरं-यवसुरा, ब्राह्मणसेनम्-ब्राह्मणसेना । अबहुसम्बन्धार्थं छायाशब्दग्रहणम्— कुड्य-च्छाया-कुड्यच्छायम्— कु + यक्, डुगागमः । गोशालम्-गोशाला । तत्पुरुष इत्यधिकारात् **बहुव्रीहौ त्रिलिङ्गः**— दृढसेनः, दृढसेना, दृढसेनम् ।

हिन्दी– सुरा-सेना-छाया-शाला और निशाशब्दान्त तत्पुरुष स्त्रीलिङ्ग तथा नपुंसक लिङ्ग में होते हैं । जैसे— यवसुरं, यवसुरा आदि ।

१३०/१४. परवत् । इत्यस्मात्पूर्वं क्वचित् शिष्टमित्यपि पाठ उपलभ्यते ।

व्याख्या– यत्र शिष्टमिति पाठस्तत्र उक्तात्पूर्वकथितादन्यदिति शिष्टम् । उक्तभिन्नः तत्पुरुषः परवल्लिङ्गः स्यात् । यथा— राज्ञः पुरुषः राजपुरुषः— राज् + कनिन्, रञ्ज-यति— रञ्ज् + कनिन् नि. वा + पुरुषः । राजमहिषी— राज्ञः महिषी (ज्येष्ठा राज्ञी), षष्ठीतत्पुरुषसमासः, राजधनमित्यादि ।

हिन्दी– पूर्व सूत्र में उक्त भिन्न तत्पुरुष पर शब्द के समान लिङ्ग होता है । जैसे— राजपुरुष आदि ।

१५. रात्राह्नाहाः पुंसि । सूत्रमिदमष्टाध्याय्यां २।४।२९ स्थाने विद्यते, क्वचिदत्रापि गृहीतमस्ति ।

व्याख्या– कृतसमासान्तरात्राद्यन्तस्तत्पुरुषः पुंस्येव स्यात् । परवल्लिङ्गतापवादः । तदन्तद्वन्द्वोऽपि पुंसि स्यात् । सूत्रपाठे परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरित्युपक्रमेण एतदपवादसूत्रे द्वन्द्वपदस्याप्यनुवर्त्तनात् । तद्यथा– पूर्वरात्रः— पूर्व + अच्, अपररात्रः, पूर्वाह्णः, अपराह्णः, द्व्यहः । द्वन्द्वे— अहश्च रात्रिश्च अहोरात्रः ।

हिन्दी– समास होने पर रात्र, अह्न और अह शब्दन्त तत्पुरुष पुंल्लिङ्ग में होते हैं ।

१३१/१६. अपथपुण्याहे नपुंसके । अपथञ्च पुण्याहञ्चेति— द्वन्द्वसमासोऽत्र ।

व्याख्या– अपथ-पुण्याहशब्दौ नपुंसके स्तः (भवतः) । यथा— अपथम् । तत्पुरुष इत्येव अन्यत्र— अपथो देशः 'अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः' (रघु०-१।७४) । पुण्याहस्य तु पुंस्त्वे प्राप्तेऽयमारम्भः स तु तत्पुरुष एव । बहुव्रीहौ समासान्ता प्रसक्तेः वार्त्तिके पुण्यसुदिनामह्नः क्लीबता इत्युक्तेः । सुदिनाहम् । अपथेति निर्देशात् कृतसमासान्त एव सूत्रं प्रवर्त्तते नेह अपन्थाः ।

हिन्दी– अपथ और पुण्याह— ये दोनों शब्द नपुंसक लिङ्ग में होते हैं ।

१३२/१७. संख्यापूर्वा रात्रिः । सङ्ख्या पूर्वा यस्याः रात्र्याः सा संख्यापूर्वा रात्रिः (बहुव्रीहिसमासः) ।

व्याख्या– संख्यावाचकपूर्वपदः रात्रान्तस्तत्पुरुषः क्लीबे स्यात् । पुंस्त्वापवादः । यथा– त्रिरात्रं, पञ्चरात्रं, गणरात्रम् । संख्यापूर्व इति किम् ? सर्वरात्रः ।

हिन्दी– संख्यावाचक पूर्वपद रात्रान्त तत्पुरुष समासयुक्त शब्द नपुंसक लिङ्ग में होता है । जैसे— त्रिरात्रम् आदि ।

१३३/१८. द्विगुः स्त्रियां च ।

व्याख्या– द्विगुसमासनिष्पन्नः शब्दः स्त्रियां चात् नपुंसके च स्यात् । व्यवस्थितविभाषेयं व्यवस्था च सूत्रपाठेन वार्त्तिकपाठेन दर्शिता यथा स नपुंसकम् स समाहारद्विगर्नपुंसकलिङ्गः स्यात् । परवल्लिङ्गतापवादः । यथा— पञ्चगवम् । व्यवस्थया— इयं पञ्चमूली । एवमेव त्रिलोकी, पञ्चखट्वी, पञ्चतक्षी-प्रभृतिशब्दाः ।

हिन्दी– द्विगु समास से निष्पन्न शब्द स्त्रीलिङ्ग और नपुंसक लिङ्ग में होते हैं ।

१३४/१९. इसुसन्तः । इस् + उस् + अन्तः— द्वन्द्वात्मको बहुव्रीहिः ।

व्याख्या– इस्-प्रत्ययान्तः उस्-प्रत्ययान्तश्च शब्दः क्लीबे (नपुंसके) स्यात् ।

यथा- इदं हविः— हूयते हु कर्मणि असुन्, 'वहति विधिहुतं या हविः' (शा०-१।१)। इस्-प्रत्ययस्य उस्-प्रत्ययस्य तु धनुः— धन् + उसि, 'धनुष्यमोघं समधत्त बाणम्' (कु०-३।६६) ।

हिन्दी– इस्-प्रत्ययान्त तथा उस्-प्रत्ययान्त शब्द नपुंसक लिङ्ग में होते हैं। जैसे— हवि, धनु आदि ।

१३५/२०. अर्चिः स्त्रियां च ।

व्याख्या– इसन्तत्वेन क्लीबत्वे प्राप्ते वचनम् । अतोऽर्चिशब्दो नपुंसके चात् स्त्रियां च लिङ्गे भवति । यथा- इदमियं वा अर्चिः— अर्च् + इसि, 'प्रदक्षिणार्चिर्हविराददे' (रघु०-३।१४) ।

हिन्दी– अर्चिस् शब्द नपुंसक और स्त्रीलिङ्ग में होता है ।

१३६/२१. छदिः स्त्रियामेव ।

व्याख्या– इसन्तत्वेऽपि छदिःशब्दः स्त्रियां स्यान्न तु क्लीबे (नपुंसके) । यथा– इयं छदिः— छद् + कि इस् वा । क्वचिन्नपुंसकेऽपि भवति आप्टेकोशानुसारेण । एवमनुशासने स्थिते पटलं छदि रित्यमरव्याख्यातारः पटलसाहचर्यात् छदिषः क्लीबतां वदन्तः उपेक्ष्याः ।

हिन्दी– इस्-प्रत्ययान्त होने पर भी छदिस् शब्द स्त्रीलिङ्ग में होता है, न कि नपुंसक में ।

१३७/२२. मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनान्नाभिधानानि ।
मुख.....धनान्नाभिधानानि— इत्यत्र द्वन्द्वगर्भस्तत्पुरुषसमासः ।

व्याख्या– सूत्रोक्तशब्दानां तद्वाचकानि च नपुंसके लिङ्गे स्युरिति । यथा— इदं मुखम्, आननम्, नयनं, लोचनम्, लोहं कालं अयः, वनं गहनं विपिनम्, मांसमामिषं पलम्, रक्तं रुधिरं शोणितम् अस्रम्, कार्मुकं शरासनम्, विवरं छिद्रं बिलम्, जलं सलिलं वारि, हलं लाङ्गलम्, धनं द्रविणं वसु, अन्नमशनम् इत्यादि । व्युत्पत्तिः– मुखम्— खन् + अच्, डित् धातोः पूर्वं मुट् च, नयनम्— नी + ल्युट्, लोह— लूयतेऽनेन लू + ह, वन— वन् + अच् ।

हिन्दी– उपर्युक्त मुख आदि शब्द तथा उनके पर्यायवाची शब्द नपुंसक लिङ्ग में होते हैं ।

१३८/२३. सीरार्थौदनाः पुंसि । सीर + अर्थ + ओदनाः— इतरेतरद्वन्द्वसमासः ।

व्याख्या– पूर्वसूत्रापवादः । सीर-अर्थ-ओदन— एते शब्दाः पुंसि (पुंल्लिङ्गे) स्युः । यथा– सीरः— सि + रक् (पृषो०), 'सद्यः सीरोत्कषणसुरभिक्षेत्रमारुह्य मालम्' (मेघ०-२) । अर्थः— ऋ + थन्, 'ज्ञातार्थो ज्ञानसम्बन्धः' । रायो हलि (पा० सू०-७।२।८५) इतिसूत्रनिर्देशात् रैशब्दस्य धनवाचित्वेऽपि पुंस्त्वमेव । क्लीबत्वे रैशब्दस्य ह्रस्वे रिण इति स्यात् । ओदनः— उन्द् + युच्, दध्योदन ।

हिन्दी– सीर, अर्थ और ओदन शब्द पुंल्लिङ्ग में होते हैं ।

१३९/२४. वक्त्रनेत्रारण्यगाण्डीवानि पुंसि च । वक्त्र-नेत्र-अरण्य-गाण्डीवानि— इतरेतरद्वन्द्वसमासः ।

व्याख्या– वक्त्र-नेत्र-अरण्य-गाण्डीवश्चैते शब्दाः पुंसि (पुंल्लिङ्गे), चकारात् क्लीबे (नपुंसके) लिङ्गे च स्युरिति । तद्यथा– अयं वक्त्रः, इदं वक्त्रम्— वक्ति अनेन वच्– करणे ष्ट्रन्, 'यद्वक्त्रं मुहुरीक्षते न धनिनां ब्रूषे न चाटून् मृषा' (भर्तृ०-३।१४७) । नेत्रो, नेत्रम्— नयति नीयते वा अनेन नी + ष्ट्रन्, 'प्रायेण गृहिणी नेत्राः कन्यार्थेषु कुटुम्बिनः' (कु०-६।८५) । अरण्यः, अरण्यम्— अर्यते गम्यते शेषे वयसि ऋ + अन्य, 'प्रियानाशे कृत्स्नं किल जगदरण्यं हि भवति' (उत्तर०-६।३०) । गाण्डीवः, गाण्डीवम्— गाण्डिरस्त्यस्य संज्ञायां च पूर्वपददीर्घो विकल्पेन, 'गाण्डीवं स्रंसते हस्तात्' (गी०-१।२९) ।

हिन्दी– वक्त्र, नेत्र, अरण्य और गाण्डीव शब्द पुंल्लिङ्ग और नपुंसक लिङ्ग दोनों में होते हैं ।

१४०/२५. अटवी स्त्रियाम् ।

व्याख्या– वनवाचित्वेऽपि अटवीशब्दः स्त्रियां (स्त्रीलिङ्गे) स्यात् । यथा– इयमटवी— अट् + अवि + ङीष् वा, 'आहिंड्यते अटव्या अटवीं' (श०-२) ।

हिन्दी– अटवी शब्द वनवाची होने पर भी स्त्रीलिङ्ग में होता है ।

१४१/२६. लोपधः । 'ल' उपधा यस्य स लोपधः— बहुव्रीहिसमासः ।

